विदं समयं चैव विद्याद्वबाहवो येषां ॥२५॥ विसर्जितः प्रस्थापितः स्वपार्षैस्तत्र स्थिते वासवके रागमनायोगादिति भावः ॥३॥
इति श्रीभागवते ८ स्कंधे षष्ठोध्यायः ॥६॥ समुद्रमेममथनोद्भूतविषभीत्याखिलेजनैः स्तुतः सत्कृपयारुद्रः पपौविषमितीर्य
महेंद्रः स्वस्तायायावाचासांत्वयित्वा महामतिः युध्यभाषितनन्तवैशीशिष्टिते पुरुषोत्तमात ॥२०॥ नदरोचततैत्यस्य
तत्रान्ये चासुराधिपाः शंबरोविष्टनेमिश्च ये च त्रिपुरवासिनः ॥२१॥ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः
उद्यमं परमं चक्रुरमृतार्थे परंतप ॥२२॥ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः नदंत उदधिं निन्युः शक्ताः परि
घबाहवः ॥२४॥ २५॥ भारोद्वहश्रांताः शक्रवैरोचनादयः अपारयंतस्तं वोढुं विवशा विजहुः पथि ॥२६॥
निपतन्स गिरिस्तत्र बहूनमरदानवान् चूर्णयामास महता भारेण कनकाचलः ॥२६॥ तांस्तथा भग्नमन
सोभग्नबाहूरुकंधरान् विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥२७॥ गिरिपातविनिष्पिष्टान्विलोक्यामर
दानवान् ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥२८॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया आरु
ह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥२९॥ अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ययौ जलांत उत्सृज्य हरिः
णा स विसर्जितः ॥३०॥ इति श्रीभागवते ८ स्कंधे षष्ठोध्यायः ॥६॥ श्रीशुक उवाच ते नागराजमामंत्र्य फल
भागेन वासुकिं परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥१॥ आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह ॥ ह
रिः पुरस्ताज्जगृहे पूर्वं देवास्ततो भवन् ॥२॥
ते फलभागेनत्वमप्यमृतभागो भविष्यसीति संमंत्र्य वासुकिं नेत्रं गिरौ परिवीय समं वेष्टयाब्धिं मथितुमारेभिरे ॥१॥
वासुके मुखं तीव्रं दैत्यानुग्राहयित्वं पवएवं हरिः पुरस्तान्मुखं जगृहे ततो भवन् मुखं जगृहुः ॥ २ ॥ ॥ राम १८

कृतोथारणो स्थानविभागोयैः ८॥ देवेनहेतुनास्वपौरुषेनहृष्टस्तिः॥ ९॥ विघ्नेशस्य विधितेनरचितं विघ्नं प्रवितथः सत्यो
भिसंधिः संकल्पोयस्य ८ सत्तयोजनप्रस्तारो विस्तारोस्यास्तीति तथानेनहृष्टेन॥ ३॥ तस्यगिरेरावर्तनं भ्रमणमंगकेकृत्य
तन्नैकं नैत्य पतयो महापुरुषवेष्टितं नगृह्णामि वयं पुच्छं प्रहेरंगममंगलं॥ २॥ स्वाध्यायश्रुतसंपन्नाः श्रया
ताजन्मकर्मभिः इतिस्त्रुत्वोस्थिता नैत्यास्त्रिलोकापुरुषोत्तमः॥ ४॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः
कृतस्थानविभागास्तेपर्वंकश्यपनंदनाः ममंथुः परमायत्ता अमृतार्थंपयोनिधिं॥ ५॥ मथ्यमानेर्णवेसोद्रि
रनाधारोह्यपोविशत् ध्रियमाणोपि बलिभिर्गौरवात्पांडुनंदन॥ ६॥ ते सनिर्विण्णमनसः परिम्लानमुखश्रियः
आसन्स्वपौरुषेनहृष्टेदेवेनातिबलीयसा ७ विलोक्य विघ्नेशविधितं दीश्वरोद्भुतवीर्योवितथाभिसंधिः कृ
त्वावपुः काच्छपमद्भुतं महत्प्रविश्यतोयंगिरिमुज्जहार॥ ८॥ तमुत्थितं वीक्ष्यकुलाचलं पुनः समुत्थितानि
र्मथितुंसुरासुराः दधार पृष्ठेन सलक्षयोजनप्रस्तारिणा द्वीप इवापरोमहान्॥ ९॥ सुरासुरेंद्रैर्भुजवीर्यवे
पितं परिभ्रमंतं गिरिमंगपृष्ठतः बिभ्रत्तदावर्तनमादिकच्छपो मेनेंगकंडूयनमप्रमेयः॥ १०॥ तथासुराना
विपादास्मेरेणाद्रूपेणा तेषां बलवीर्यमीरयन् उद्दीपयन्देवगणांश्चविष्णुर्दैवेन नागेंद्रमबोधरूपः॥ ११॥ उपर्य
गेंद्रं गिरिराडिवान्य आक्रम्यहस्तेन सहस्रबाहुः॥ तस्थौ दिवि ब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिः सुमनोभिवृष्टः
उपर्यधश्चात्मनिगोत्रनेत्रयोः परेणा तेप्राविशतासमेधिनाः॥ ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षो
भितनक्रचक्रं॥ १४॥ अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोसुराः॥ पौलोमकालेयब
लील्वलादयो दवाग्निदग्धाः सरला [illegible] इवाभवन्॥ १५॥
नंसेतेरुप आमदेरणास्सरा कारेणादेवं नदेवा कोरेणाद्रूपेणा विशन्॥ १६॥ आत्मनि देवदेवस्य मध्ये गोत्रदारुसद्रूपेणा नेत्रस्व
भेयावोधरूपेणा परेणा हरिणा क्षोभितनक्रानां वक्रे समक्षोयस्मिन्॥ १७॥ दृश्य [illegible] मुखानि वह्नौ मा [illegible] अहींद्रस्य साहस्र

प्रपरिभिन्नाः कठोरा येदृगादयः तेभ्यो निर्गताभ्यामग्निधूमाभ्यामा
हतवर्चो येषां ते सरला द्रुमविशेषाः १५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी १५

देवास्तु भगवद्दर्शनाभावेनाः सममभ्यवर्षन समुद्रोर्मिभिः कपगूढावायवश्च शीतलावबुः वांतिस्म कथंभूतांस्तस्य श्वास
श्चिलादिभिर्हतान्प्रभावेषां धूम्राणपवरादीतियर्षा ॥१६॥ धृतेनाद्रिं यैर्न सधृतानाद्रिभगवानपरपुरुषो योभुतेनत्वयः क
थंभूतः कनकपरिधिर्पीतवासाः कर्णौविद्योतमानाविद्युत्कुंडलललद्वलाणा यस्य सतथा मूर्ध्नि भ्राजंतो विलुलिता
कचा यस्य सतथा नेत्रश्रिमुभिः दंदशूकं सर्पप्रतिगिरिः प्रतिद्वंद्वीपर्वतः ॥१८॥ हालाहलमिति शाह्वनामयस्यस
भ्रांताउद्भूतामकरादयश्च यस्मिन मत्स्यादिभिराकुलाश्च ॥१९॥ तद्विषमप्रति अप्रतिमं प्रतिक्रियाऽस्त्यं इति वाऽऊनउ

देवांश्च न कृष्णासश्चिलाबाहनप्रभावान्धूम्रांबरस्रग्वरकंचुकाननान ॥ सममभ्यवर्षन्भगवद्वशा घना ववुः समु
द्रोर्म्युपगूढवायवः ॥१६॥ मथ्यमानात्तदा सिंधोर्देवासुरवरूथपैः ॥ यदा सुधा न जायेत निर्ममंथाजितः स्व
यं ॥१७॥ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः ॥ जैत्रै
र्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः ॥१८॥ निर्मथ्यमानादुदधे
रभूद्विषं महोल्बणं हालहलाह्वमग्रतः ॥ संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुला
त् ॥१९॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ॥ भीताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्य
माणाः शरणं सदाशिवं ॥२०॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याभिमतं मुनीनां ॥ आसीनमद्रावप
वर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥२१॥ प्रजापतय ऊचुः देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहि
नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥२२॥ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः ॥ तं त्वामर्चंति कुशलाः
प्रपन्नार्तिहरं गुरुं ॥२३॥ ॥ राम

उग्रवेगो यस्य तद्देवाह दिशिदिशीति यद्वा उग्रा वेगा रोमांचस्वेदादयो यस्मात् अत एवासह्यं विलोक्य भीताः अन्ये
न केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः ॥२०॥ त्रैलोक्या उद्भवाय देव्या सह अद्रौ कैलासे आसीनं तथापि
मुनीनां अभिमतं तेषामेवापवर्गाय तपो जुषाणं ॥२१॥ निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः स्तुवंतस्तं प्रजेशाना

॥ ८ ॥ स्कंध [illegible] १५

नन्वेवंभूतोऽपि समुदितिप्रसिद्धं तत्राह ॥ गुणमय्येति अस्य जगतो यदाश्रयोऽसौ नित्यस्तेन दाहे भूमन्नस्वटकस्तनः सिद्धान्तानस्त्व
ब्रह्मादिसंतापेऽध्य ॥ २४ ॥ न तद्धेतुः वंचेत्तिनिसदसत्तो भावोऽनेवतिर्यगादिस्थान्नावयतीतितयोस्त्वमेतत्त्वद्व्यतिरिक्तं नास्तीत्या
ह ः आत्मैवत्वं नानाप्रकृतिभिः ॥ जगद्रूपेणभातः यस्मादीश्वरः स्वतः सिद्धत्वान्नुपपादयेतः जगदात्मनाप्यात्मनः प्रकार
माह ॥ २५ ॥ तत्वाह्वस्यवेदस्ययोनिः स्तनः स्वतः सिद्धत्वानः वंजगदादि महत्तत्त्वं आत्मा वाहंकारः कथंभूतः प्राणेंद्रियद्रव्या

गुणमय्याश्च मायास्य सर्गस्थित्यप्ययादिभो ॥ धत्ते यदाश्रयः स्वप्नभूमन्नस्त्वसि विभो शिवाभिधः ॥ २३ ॥ त्वं ब्रह्मपरमं गुह्यं
सदसद्भावभावनः नानाशक्तिभिराभातः त्वमात्मा जगदीश्वरः ॥ २४ ॥ त्वं ब्रह्मयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्य
गुणस्वभावः कालः क्रतुः सत्यमृतं च धर्मः त्वय्यक्षरं यत्त्रिवृदामनंति ॥ २५ ॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदु
र्लोकभवांघ्रिपंकजं कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं ॥ २६ ॥ नाभिर्नभस्ते श्वसनं न
भस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः ॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते ॥ २७ ॥ कुक्षिः
समुद्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते ॥ छंदांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन् हृदयं
सर्वधर्मः ॥ २८ ॥ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यं परमार्थतत्त्वं देव स्वयं
ज्योतिरवस्थितिस्ते ॥ २९ ॥ ॥ राम ॥ ॥

नोंकारस्तां भूतागुणा यस्य राजसादिरिति विधः इत्यर्थः स्वभावाद यश्च व मेवक्रतुः संकल्पः सत्यमृतं चेति यो धर्मः सत्वं म
हदादिरूपवेदेतुः त्रिवृत्त्रिगुणात्मकं यदक्षरं प्रधानं तत्त्वयि तदाश्रयं तदामनंतिपुण्य एवंभूतेन यत्रित्वत्तदक्षरं प्रणवं प्रकाश
माहुरित्यर्थः अखिलदेवतात्माग्निः सर्वदेवतारतिश्रुतेः सोऽग्निस्ते मुखं हे लोकभवत्स्थितीयां तेऽघ्रिं विदुरित्यस्य संबंधः
२६ परावरे चैव ये आत्मानो जीवास्तेषामाश्रयणमाश्रयः तवात्माऽहंकारः २७ त्रयीमयात्मन्वेदत्रयमूर्ते २८ पंचोपनिषदः
तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्रा यैः त्रिंशत्कलाष्टोत्तरत्रिंशन्मंत्राणां वर्गः तेषामेव मंत्राणां पदके केनाष्टोत्तर

त्रिंशत्कलात्मका मंत्रा इत्यर्थः अवस्थितः ऽपरतावस्था २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अधर्मस्योर्मिषु दंभलोभादिषु यैर्भूर्मिभिर्विसर्गः प्रतिसर्गसंहारः यद्वा यैः सत्त्वादिभिः त्रिविधः सर्गः तानि नेत्रत्रयं हे देव छं-
दोमय ऋषिर्देवः सत्त्ववेत्तारः तेषां सांख्यात्मनुरितिपाठे मनुर्वेदः तेनैवाह छंदोमय इति ॥ ३० ॥ हे गिरित्र तव परं ज्योतिरखि-
लानां लोकपालादीनां गम्यं न भवति कुतो यत्र रजआदि नास्ति किं तत् ज्योतिः यन्निरस्तभेदं ब्रह्म ॥ ३१ ॥ कामश्चाध्वरस्त्रिपुरश्च
दत्तः त्रिपुरादयः च येषां अनेकभूतद्रुहस्तान् क्षपयतः संहरतस्ते तत्कर्म स्तुतये न भवति अत्यल्पमेतदित्यर्थः यः स्वं तदा-
स्याप्यवयवभाविनेतसिद्धवन्निर्दग्धः स्तुतये खलेन भवतीत्यत्र हेतुः यस्त्वं भवान् स्वनेत्रवह्निविस्फुलिंगस्य शिखया

छायान्त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि । सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देव ऋषिः
पुराणः ॥ ३० ॥ न ते गिरित्राखिललोकपालविरिंचिवैकुंठसुरेंद्रगम्यं । ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्र-
ह्म निरस्तभेदं ॥ ३१ ॥ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते । यस्त्वंतकाल
इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न वेद ॥ ३२ ॥ ये त्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं च-
रंतमुमया तपसाभितप्तं । कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ३३

दग्धं तदपि इति भस्म ज्ञातं न वेद नालोचयत् अपि ॥ ३२ ॥ न देवं नित्यं परानुग्रहव्यग्रं ज्ञात्वा ये निंदंति ते निर्लज्जा इत्यर्थः ये
तु उमया सह चरंतं तपस्याभितप्तं कामिनं कथयंते श्मशाने निरतं तथा श्मशानेषु चरंतं उग्रक्रूरं परुषं वहिः खेदकं त्यक्तं क-
थंभूतं आत्मारामा ब्रह्मगुरवो विश्वहितोपदेष्टारस्तैर्हृदि चिंतितांघ्रिद्वंद्वं यस्य तथाभूतमपि तपसाभितप्तमपि
ते नूनं तव ऊतिं अविदन् निग्रहाकृतः तस्त्रीलौन्येव विद्वत्त्वात् अतो हातलज्जास्त्यक्तत्रपाः कथमात्मारामैः सेवित-
चरणयुगलस्य कामित्वसंभवः कथं वा तपसाभितप्तस्य श्मशाने स्थायित्वे परुषत्वं वा संभवतीत्यविचार्यैव प्रलापादि-
त्यर्थः ॥ ३३ ॥

अस्मिन्नावद्विंदकानां वार्त्ता महान्तोपि तववन्तं वेन ज्ञातं नीत्याह तन्नस्यान्नवस्तुरूपस्य गमने तेनाने ब्रह्मादयोपि न तस्म
र्थाः संस्तवने तत्कृतः श्राक्ताः स्तुलत्तवयेकथप्रभवामयनस्तेषां सर्गेभ्यन्तेनावांचीनायापि पदेतन्स्तवने पनः शान्म श्रा
क्रिपरिमितमात्रमित्यर्थः तदेवाह ः पतत्परमिति ॥ २४ ॥ नपरं रूपनयापि नदर्शनादेवहूतायोवयदन्याह ः ॥ न्द्रना
यहीति ॥ २ ॥ मत्प्रभावमविचार्य विषपाने प्रवृत्तं मां कथं विदितं प्रियावारयेदितिषां कयानामनुज्ञापयन्नाह अहोव
त नस्पतेसदसनोपरतः परस्यतोजः स्वरूपगामनेप्रभवंतिभूमनः ॥ ब्रह्मादयः किमुत संस्तवनेवयं नूतनस्प
गोसर्गविषयाअपि पाक्ति मात्रे ॥ २४ ॥ पतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेव्य
क्तकर्मणा ॥ २५ ॥ मूकः ॥ तदीस्य ब्रसनेतामाह कृपयाभूशपीडितः ॥ सर्वभूतसुहृद्देवइदमाह सतीप्रियां
अहोबत भवान्येतत्प्रजानांपश्यवैशसं क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ॥ २७ ॥ आसांप्राणपरी
प्सूनां विधेयमभयं हि मे पतावान्हि प्रभोरर्थो यद्दीनपरिपालनं ॥ २८ ॥ प्राणैः स्वैः प्राणिनः पांति साध
वः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ २९ ॥ पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ॥ प्री
ते हरौ भगवति प्रीयेहं सचराचरः ॥ ३० ॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ॥ पवमामंत्र्य भगवान्भवानी
विश्वभावनः ॥ ३१ ॥ तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ॥ ततः करतलीकृत्य व्यापि हालाहलं विषं ॥ ३२ ॥
अभक्षयन्महादेवः कृपया भूतभावनः ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ ३३ ॥ यच्चकार गले
नीलं तच्च साधोर्विभूषणं ॥ तप्यते लोकतापेन साधवः प्रायशो जनाः ॥ ३४ ॥ परमाराधनं तद्धि पुरुषस्याखिला
त्मनः ॥ निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥ ३५ ॥ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ॥ प्रस्कन्नं
नेतिसार्थैस्तदुष्मिर्विषांसंद्रुः स्वं ॥ ३६ ॥ प्राणोकृतां पाणतलाद्यत्किंचिज्जगृहुः स्म तान् ॥ मयाप्रभोः समर्थ स्यार्थः कार्यं किंचिद्वद्वैरेषु भू
तेषु परस्परं जिघांसत्स्वं ॥ २८ ॥ टीकाप्युक्ता २९ कृपयतः कृपां कुर्वतः पुंसः ॥ ३१ ॥ सेमंत्रः शोभना समस्तास्वस्ति सुखेनजीवि
तमस्त्वित्यर्थः ॥ ३१ ॥ जग्धुमत्तुं करतलीकृत्य करतलपरिमितमात्रं कृत्वा ॥ ३२ ॥ जलकल्मषः जलदोषो विषं

अ उ अ पु ४९ ॥

[illegible]

४३

कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः तस्मिन्मणौ स्पृहां चक्रे वक्षोऽलंकरणे हरिः ५

श्री भाग० टी० १०

भूषणे एव ये सविषाः ते पितुगृहं श्वनेन विषस्य तीव्रता उक्ता ॥४५॥ इति श्रीभावार्थदीपिकायां अष्टमस्कंधे सप्तमः ॥७॥ अ
ष्टमे मथ्यमानेऽब्धौ लक्ष्म्याविर्भवनं ततः ॥ यत्र वव्रे हरिं सेमा मोहिन्या द्वावयं पिवे हविर्धानी सुरभिः १ देवयानस्य ब्रह्मलो
कमार्गप्रापकस्य यज्ञस्य मेध्याय शुद्धाय हविषे ॥२॥ ईश्वरशिक्षया भगवद्वाक्येन याचवन्या उ ॥३॥ भगवतः यशः श्वेताद्रेः कै
लासः तस्य महिमानं दंतैः शिखरतुल्यैर्हरन् ॥४॥ वल्गुभिर्गत्यादिभिः स्वर्गिणां रतिकर्त्र्यः ॥७॥ सुदामा नाम पर्वतः तेन उप
लक्ष्यां दिशि जाता सौदामिनी स्फटिकाद्रियत्तिभिः ... विस्फुरन्ती विद्युदिव कान्त्या दिशो रंजयन्ती श्रीः

वृषिकाहितैर्विधावधयोदंद शुकाश्वयेपरे ॥४६॥ इति श्रीभागवते अष्टमे सप्तमोऽध्यायः ॥७॥ श्रीशुकः पीते गरे ॥
वृषांकेन प्रीतास्तेऽमरदानवाः ममंथुस्तरसा सिंधुं हविर्धानी ततोऽभवत् १ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्म
वादिनः यज्ञस्य देवयानस्य मेध्याय हविषे नृप २ तत उच्चैःश्रवा नाम हयोऽभूच्चंद्रपांडुरः तस्मिन्ब
लिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ३ तत ऐरावतो नाम वारणेंद्रो विनिर्गतः दंतैश्चतुर्भिः श्वेताद्रे
र्हरन्भगवतो महिं ॥४॥ ततोऽभवत्पारिजातः सुरलोकविभूषणं पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा
भवान् ॥६॥ ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ७
ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा रंजयंती दिशः कांत्या विद्युत्सौदामनी यथा ॥८॥ तस्यां चक्रुः
स्पृहां सर्वे ससुरासुरमानवाः रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥९॥ तस्या आसनमानिन्ये महें
द्रो महदद्भुतं ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥१०॥ आभिषेचनिका भूमिराहरत्सकलौषधीः
गावः पंच पवित्राणि वसंतो मधुमाधवौ ॥११॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गं

टी० १

संपत्सा दानमूर्तिधारिणी सती सैव भगवत्परा रमाविरभूदित्यर्थः ॥८॥ तस्या रूपादिमहिम्ना आक्षिप्तं चेतो येषां भगवद्व
तमिच्छितवत्या श्रिया विलोकितानां देवानां यथा एवं सर्वसंपत्प्राप्तिः सुरासुराणां वत्स्थिर्पर्यंवस्कं अभिषेकादि महोत्स
वपूर्वकं ब्रह्मादिपरिहारेण भगवन्तमेव प्रकारमाह तस्या आसनमित्यादि श्रियासीदाकर्णनेन आक्षेनेन ग्रेयेत अभि
षेचनिकाः अभिषेकोचिताः पंचपवित्राणि पंचगव्यानि मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादि पाठांतरे पि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शंखवेणुवीणास्त्रुध्वनादयन्तस्तुमुलो निःस्वनो येषां तान् ऋद्देगान ॥१७॥ यदमाश्रयं ध्रुवं नित्यं श्रुत्याभिचारिणो नित्याः संतो गु-
णा यस्मिन् तत्त्वान्वविंदन् क्वचित् कस्य विशेषस्य सद्भावात् न देवाहं नूनमिति त्रिष्विति ॥१८॥ मन्युनिर्जयो नास्ति दुर्वासः प्रभृतिषु
गुरुषु शुक्रादिषु संगवर्जितं ज्ञानेनास्ति महत्त्वेपि तत्र सोमादीन कामनिर्जयः परतो व्यपाश्रयो पेक्षः इंद्रादिः स किमीश्वरः ॥१९॥ मूलस्रो-

पाठ्ययः

मेघामृदंगपणवमुरजानकगोमुखान् ध्वनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् ॥१२॥ ततोभिषिषिचु-
र्देवीं श्रियं पद्मकरां सतीं दिग्गिभाः पूर्णकलशैः शुक्लवाक्यैर्द्विजेरितैः ॥१३॥ समुद्रः पीतकौशेयवाससी समुपाह-
रत् वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां ॥१४॥ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः हारं सरस्व-
ती पद्ममजो नागाश्च कुंडले ॥१५॥ ततः [illegible] कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ॥ चचा-
ल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं १६ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमो-
क्षितं ततस्ततो नूपुरवल्गु शिंजितैर्विसर्पती हेमलतेव सा बभौ ॥१७॥ विलोकयंती निरवद्यमात्मनः पदं
ध्रुवं चाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत् ॥१८॥ नूनं तपो यस्य न मन्यु-
निर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितम् क्वचिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥१९॥
धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचि[illegible]न्न स मुक्तिकारणं ॥ वीर्यं न पुंसोस्त्यजवेगनि-
ष्कृतं न हि द्वितीयो गुणसंगवर्जितः ॥२०॥

हृदयं पशुरामादिषु न मुक्तिकारणं त्यागः शिबिप्रभृतिषु पुंसः कर्त[illegible]दिवीर्यादेर्वीर्यमस्ति परं न वेगानिष्कृतं काल-
वेगेन परिहृतं तु न भवति गुणसंगवर्जितः सनकादिः द्वितीयः मम वरो नहि समाधिनिष्ठत्वात् ॥२०॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चिरायुष्यपि मार्कंडेयादौ शीलं मंगलं नास्ति इंद्रियदमनशीलत्वात् क्वचिन्न दयास्ति हिरण्यप्रभृतौ आयुरुपलक्षणं स्यैर्येनवे
शेदुर्जीनश्रीभगवद्गुणाश्रयकस्मादेवमनुमेभावात् यत्रकृतवर्षीके इमा मार्कंडेयादिवदिंद्रियदमनाद्यभावान्न शीलं मंगलं।
चिरायुर्मिथुयश्चानुभयमलिनाचान्यः पूर्वोक्तः कश्चिद्दोषः तथापि सोप्यमंगलः पुनः शानवासाय मंगलचेष्टितः श्रीम
कुंदलतीक्षाव्याहा कश्चेति कश्चिन्नमंगलः निरवयश्च मनुमानादिकं दत्ते ग्राम्यारामत्वात् ॥२१॥ एवं विमृश्य पवमानि
वशोपेदतमपि मुकुंदमेव वरं वव्रे तत्किमव्यभिचारिभिः मद्भिर्धर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतया वैनं रूपेत्येण वरे
सर्वोत्तमं तत्र हेतुस्त्रगुणाश्रयं प्रकृतिगुणातीतेन पादांतरे निजैकाश्रयमद्गुणाश्रयमयमेवार्थः अतएव स्वस्येप्सितं।

नो विद्विरायुर्नहि शीलमंगलं क्वचिन्नदयास्तिनवेदमायुषः यत्रोभयं कुत्रच सोप्यमंगलः सुमंगलः कश्च
नकांक्षते हि मां ॥२०॥ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतया गुणाश्रयं ॥ वव्रे वरं सर्वगुणैरपे
क्षितं रमा मुकुंदं निरपेक्षमीप्सितं ॥२१॥ तस्यांसदेश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरो
पघुष्टां ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहास
विकसन्नयनेन याता ॥२२॥

किंच सर्वगुणैरणिमादिभिरपेक्षितं वृतमपेक्षितं भावः यद्यपि स्वयमात्मारामत्वेन स्वतन्त्रनिरपेक्षः तथाप्यात्मनाप्यणिमा
दिसिद्धीर्यथा नोपेक्षते तथा मामपि नोपेक्षते न तावदेव वनत्वेन वयाहं कृतार्था स्यां किमन्यैः ॥ प्राकृतैरिति नमेव वृत
वती निजदेवाह ॥२२॥ तस्यांसदेशे कमनीयां नवकंजमालां निधाय तदुरुग्रहे प्रतीक्षमाणा तस्थौ तस्य निकटे
तस्याः कथंभूतां मालां माद्यंतो ये मधुव्रताः तेषां वरूथस्य गिरा उपघुष्टां नादितां कथंभूता श्रीः ॥ सव्रीडहासेन
विकसन्नयनेन तस्य उरः स्वधाम यातापि सती वक्षः प्रतीक्षमाणा तस्या वित्यर्थः ॥२३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भगवानपि त्रैलोक्याभिवृद्धये सर्वदा तस्याः स्थानं ददावित्याह तस्याः अतिविशिष्टाभूतये विभवाय तस्याः तस्याः त्रि
जगतो जनन्याः श्रियः परमं स्थानमिति मे यत्नात्वर्थे पद ॥२४॥ तल्लिंगैर्विलसत्प्रतिपादकै रचितैर्वर्यथार्थैः २६ बाहुणीव
निरीक्षणेन

तस्याः श्रियास्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थि
तैधयत्समाधिपतीस्त्रिलोकान् ॥२४॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः देवानुगानां सस्त्रीणां नृत्यतां
गायतामभूत् ॥२५॥ ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुं ईडिरे वितथैर्मन्त्रैस्तल्लिंगैः पुष्पवर्षिणः २६
श्रियावलोकिता देवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां ॥२७॥ निःसत्त्वा
लोलुपा राजन्निरुद्योगा गतत्रपाः यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥२८॥ अथासीद्वारुणी देवी
कन्या कमललोचना असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥२९॥ अथोदधेर्मथ्यमानात्काश्यपैरमृता
र्थिभिः उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥३०॥ दीर्घपीवरदोर्दण्डः कंबुग्रीवोऽरुणेक्षणः श्यामलस्
तरुणः स्रग्वी सर्वाभरणभूषितः ॥३१॥ पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः ॥ नीलकुञ्चितकेशान्तः सु
भगः सिंहविक्रमः ॥३२॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांश
संभवः ॥३३॥ धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् तमालोक्यासुराः सर्वे कलशं चामृताभृतं
॥३४॥ लिप्सन्तः सर्ववस्तूनि कलशं तरसाहरन् ॥ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥३५॥ २६

रुणो देवतोपदर्शनमयी सा ॥३०॥ दीर्घौ पीवरौ दोर्दण्डौ यस्य कंबुग्रीवः शंखवत् त्रिरेखा ग्रीवा य
स्य स्निग्धाः कुञ्चिताः केशानामन्ता यस्य ॥३२॥ सर्वं टीका ३ इज्यभाक् यज्ञभागभोक्ता अमृतेन आभृतं परिपूर्णं

मिथः दैत्यानां परस्परं कलहेऽभवत् दैत्येन येन मायया अर्थसाधयिष्यामि स्त्रीतामाविश्य तेन्याहति शेषः नदेवा इ ॥ मि
थः इति नर्षः कामः तयुक्तानि चेतांसि येषां स्पेव मम अबलानां कलि अभूत ॥ ३७ ॥ दुर्बलानां आक्रोशश्च कस्मात् ॥ देवा
इति द्वाभ्यां ॥ येदेवानु तेल्यनां यासेन हेतवः साधकाः तुल्यप्रायासा हे तस्य पूनादि विषामिति वास्तव्याग पूर्वेषां।
समं फलं न हत ॥ तथा च ऋतिः इष्टिकामाः सत्रमासीरन्नि तियेयजमानाः ते स्वनिज इति च न हयं वर्णयति पंच स्मि:

विषम मनसो देवा हविंशाव गामायपु: इति तिदैत्यमालोक्य भगवान्भृत्यकामकृत ॥ ३६ ॥ माविधत मि
थार्थवः साधयिष्य स्वमायया ॥ मिथः कलिभूतेषां न दर्श्यं न संचेतसां ॥ ३७ ॥ श्रुहं एवं महे एवं नं नंनव मिति
प्रभो ३८ देवाः स्वभागमर्हेति ये तुल्यायास हेतवः ॥ सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥ इतिस्वा
न्यत्वेष पूर्वेदैत्ये याञ्जातमन्त्तरां दुर्बलाः प्रबलाकृष्टजनगृहीतकलशात्सुङ्ः ॥ ४० ॥ यतस्मिन्नेतरे वि
ष्णुः सर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ॥ ४१ ॥ प्रेक्षणीयोत्पलश्यामं सर्वावयव
सुंदरं समानकर्णाभरणं सुकपोलोन्नसाननं ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरं ॥ मुखामोदानु
रक्तालिझंकारोद्विग्नलोचनं ॥ ४३ ॥ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लिकां ॥ सुग्रीवकंठाभरणं।
सुभुजांगदभूषितं ॥ ४४ ॥ विरजांबरसंवीतनितंबद्वीपशोभया कांच्या प्रविलसद्वल्गुचलच्चरणनूपु
रं ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः दैत्ययूथपचेतःसु काममुद्दीपयन्मुहुः ४६
३९ टीका एवं ॥ ४० ॥ प्रेक्षणीयमुत्पलवत्श्यामं सर्वेषु अवयवेषु सुंदरं समानयोः आभरणं यस्मिंस्तत् ॥ ४२ ॥ शोभना ग्रीवा
येन तत्कंठाभरणं यस्मिन् निवासभुजयोः अंगदाभ्यां भूषितं ॥ ४४ ॥ विरजांबरेण संवितो नितंब एव द्वीपो विशाल
त्वात् तस्य शोभाय कांच्या सकंठया विलसद्वल्गु यथा भवत्येवं चलनौ चरणौ यस्य नूपुरे यस्मिन् ॥ ४५ ॥
सव्रीडेन समं विक्षिप्ते के पिनाया भ्रू तस्या विलासेन सह या नव अवलोकितानि तैर्दैत्ययूथपानां चेतःसु मुहुर्मुहुः का

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इति श्रीभागवते षष्ठस्कंधे षष्ठमोध्यायः ॥ ५ ॥ नवमे मोहिते दैत्यैर्वर्णितेस्त नभाजने ॥ नदंषेनेन देवेभ्यो मथितं दत्तं ततो यथा
ग्रहातृप्ती स्यं यथामृतिः इति वदंतः कालमित्यादि पञ्चसु ॥ २ ॥ मथ्नती वत्नाभयंनीव ॥ ३ ॥ कस्यासीत्यर्षु तत्र मस्यामिः ॥ ४
तम्नेनवैकेश्चिडुकः एवंन्याहु नेतिन्वान्नाव्रमरादिभिरस्यः ॥ ५ ॥ एवं न ज्ञानी मह इति तत्रापि तज्ज्ञानीमपव ॥ ६ ॥ स्त्रासना ॥

इति श्रीभागवते षष्ठस्कंधे षष्ठमोध्यायः ॥ ७ ॥ श्रीशुकः ॥ तेन्योन्यतो सुराः पात्रं हरंतः त्यक्तसौहृदाः ॥ क्षिपंतो द
स्युधर्माणआयांतीं ददृशुः स्त्रियं ॥ १ ॥ अहो रूपमहो धाम अहो अस्यानवं वयः ॥ इति ते तामभिद्रुत्य पप्रच्छुर्जात
हृच्छया ॥ ४ ॥ कानं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि ॥ कस्यासि वद वामोरु मथ्नंतीव मनांसि नः ॥ ५ ॥ न
वयं त्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ६ ॥ नूनं त्वं विधिना सुभ्रु प्रे
षिता सत्यशरीरिणां ॥ सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किं ॥ ५ ॥ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥
ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ॥ ८ ॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं
नैव भेदो यथा भवेत् ॥ ७ ॥ इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवी
त् ॥ ८ ॥ श्रीभगवान् ॥ कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ॥ विश्वासं पंडितो जातु कामिनीषु न याति
हि ॥ ९ ॥ शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ॥ सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां ॥
१० ॥ श्रीशुकः ॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ॥ जहसुर्भावगंभीरं ददुश्चामृतभाजनं ॥ ११ ॥ ॥ ॥
मिदं न दृष्टं न जानीमः स्रोपणासंपादितमित्याहुः ॥ नूनमिति सर्वेंद्रियाणां मनसः च प्रीतिं विधातुं सघृणेन किं प्रेषितासि किं
वा यदृच्छयैवागतासि नेवं नूनं प्रेषिताप्येवेत्यर्थः ॥ ५ ॥ भेदो विग्रहो यथा न भवेत्तथा ॥ ७ ॥ संगताः प्रवृत्ताः ॥ ९ ॥ हे
सुरद्विषः ॥ १० ॥ भावेन केनाप्यभिप्रायेण गंभीरं यथा भवत्येवं जहसुः ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईषल्लिसितेन शोभा यस्याः तथा मया कृतं सा धावा यथ्यपुपेत मंगीकृतं न ताहि विभते ॥ १२ ॥ सम वपुंगवाः दैत्य श्रेष्ठाः श्र
माणा मियत्नाम जानेतः ॥ १३ ॥ यथोपजोषं यथ प्रीति सृष्टं तस्य लक्षणं सृष्टं येत्र निर्मुक्त मुक्तं वासः स्वयं भुवा शस्ते ।
तस्मां गालि केषु तावन्मात्रेण सर्वदा प्राग ग्रेषु संविविशुः ॥ १४ ॥ धूप धामोदिताया स्वरभी कृता यां शालायां ॥ १६ ॥ स्रथ
तस्यां शालायां हेतवेंद्र सा कलश पाणिरा विवेश का ... धंभूताम णिनं या दीक कनिष्ठ कर स्य कर भोवहिः करभस

तेतः गृहीतामृत भाजने हृदि विंभा यई षल्लित शोभ यामिता यथ्यपुपेन कृचसाध साफ वा कृतं मया ।
वो विभजे सुधामिमो ॥ १७ ॥ इत्यभिव्याहृतं तस्या श्राकर्णा सुरपुंगवाः स्रश्रमाणा विदतस्य तत्रेयत्यव
मेसत ॥ १२ ॥ यथोपजोषं वासांसि परिधाया हतानि ते कोशाघु प्राविशास्सर्वे प्राग ग्रेष्व भिभूषिताः ॥ १४ ॥ स्रथो
पोष्य कृत स्नाना कृत्वा दत्त्वा विधानते ॥ दत्त्वा यो विप्रमुख्येभ्यः कृतस्व स्त्ययना द्विजैः ॥ १५ ॥ प्रासुस्व ष्वपवि
ष्टेषु सेषु दितिजे षु च ॥ धूपामोदित शालायां ज्वच्छायां माल्य दीपकैः ॥ १६ ॥ तस्यां नरेंद्र करभोरु रुशा दुकू ।
ल श्रोणी तटाल सगति र्मद विह्वलाक्षी ॥ सा कूजती कनक नूपुर शिंजितेन कुंभ स्तनी कलश पाणि रथा ।
या विवेश ॥ १७ ॥ तां श्रीसखीं कनक कुंडल चारु कर्ण नासा कपोल वदनां परदेवता ख्यां ॥ संवी क्ष्य संममु
दुरुत्स्मित वीक्षणेन देवा सुरा विगलित स्तन पट्टिका नाम ॥ १८ ॥ ॥

दृशौ यस्याः माऽशां कमनीयं दुकूलं यस्मिंस्तेन श्रोणी तटेन विशालया श्रोणया स लसा मंदागा
ति र्यस्याः सापांदा तवे करभसदृशोयोः ऊर्वी यस्य दुकूलं यस्याः सा चासौ श्रोणीत स्याः तटेनाल सगति श्च मदेन
विह्वले नक्षुष्टी णी यस्याः ॥ १७ ॥ तां श्रियाः सखीमिव स्थितां देवा सुराः समस्मुह्यः कथं भूता कनकमये कुंडले य
स्याः सा चासौ चारवः कर्णादयो यस्याः सा च विगलिता विस्रस्ताः स्तनपट्टिका या श्रेतो यस्या नाम ॥ १८ ॥

एवंनामोहयित्वाथन्कृतवांस्तदाहविभिः प्रस्तवाणांस्तथादानेसर्पाणांह्नीरदानमिवदुर्नयंप्रन्यायंमन्यानो सर्थाने
भ्योनव्यभजत [illegible] प्रयंभावः दैत्यैर्मदीयंसाधुप्रसाधुवासर्वमनुमतमेवप्रनेनामङ्गक्तादेवानेवपावयिष्या
मि किंचैतैर्यथान्यायंविभजद्भिर्लब्धं ॥ नचैतेभ्योजात्यवक्रेभ्योदानेन्याय्यंप्रतस्तेभ्यः सर्थानदास्यामिति ॥ १९ ॥ एवंक्रोधः
थग्विविक्ताः कल्पयित्वापृथगासनानपंक्तिषुस्तेषुतत्सजातीयेषुतेष्वासुरानपिप्रतारणार्थंपवोपवेशयामास २
ड्यमेवैर्वद्धमानप्रियवाक्यादिनातानतिक्रम्यातिक्रम्यागमैनैः दूरस्थानपिदेवान् ॥ २१ ॥ तथाकृतः स्नेहोयेषुस्त्रि

प्रस्तवाणांस्तथादानेसर्पाणामिवदुर्नयं ॥ मत्वाजातिनृशंसानांतांत्यभजदच्युतः ॥ १९ ॥ कल्पयित्वापृथक्पं
क्तीस्तेषामेवजानानामिति तांश्चोपवेशयामास स्वास्वेषुपंक्तिषु ॥ २० ॥ दैत्यान्गृहीतकलशो वञ्चयन्नुपसं
चरैः दूरस्थान्पाययामासजरामृत्युहरांसुधां ॥ २१ ॥ तेपालयंतः समयमसुराः स्वकृतंनृप ॥ तूष्णीमास
न्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥ तस्यांकृतातिप्रणयाः प्रणयापायकातराः ॥ बहुमानेनचाबद्धा
नोचुः किंचनविप्रियं ॥ २३ ॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोममपिबच्चंद्रार्काभ्यांचसूचि
तः ॥ २४ ॥ चक्रेणक्षुरधारेणजहारपिबतःशिरः ॥ हरिः तस्यकबंधस्तुसुधयाप्लावितोपतत् ॥ २५ ॥ शिरस्त्वमर
तांनीतमजोग्रहमचीक्लृपत ॥ यस्तुपर्वणिचंद्रार्कावभिधावतिवैरधीः ॥ २६ ॥ ॥

यामस्त्रीविवादजुगुप्सया ॥ २२ ॥ कृतोतिप्रणयः स्नेहोयैः प्रणयापायेनकातराभीताः एतेनावञ्चयणः पूर्वं
किंचिन्निवेदनप्रयंतधीराः ॥ त्वयाप्रणीतत्वमित्यादिबहुमानेनचप्राबद्धानियंत्रिताः समयपालनादिभिः सद्भिरेते
कास्तौः अप्रियंकिंचिदपिनोचुः किंतुतूष्णीमासन् ॥ २३ ॥ देवपंक्तौचंद्रार्कयोर्मध्येप्रविष्टः सोमममृतमपिबत् २४
हरिः तस्यशिरोजहारप्लावितः पतितः ॥ २५ ॥ ग्रहत्वमर्यादित्वंतयग्रहत्वादिकारणम् ॥ २६ ॥ ॥ । ॥ । ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी २९

हविर्भक्तानामेवाप्यमाः फलं नान्येषामित्येवमाख्याननात्पर्यमाह ॥ एवमिति ॥ समादेशाद्यो येषां हेतुर्मंदरा
दिः अर्थः समुद्रे स्थितं वीरुधादि ॥ विविधः कल्पः फलं केषांचित्तानं केषांचिन्नेति वैचित्र्यं येषां ते फले वैषम्यं वेनाब्भवुवि
न्यार्थः तदेवाह तत्रेति सुरगणाः पादपंकजरजः श्रयणाद्देवा अमृतं फलमापुः सत्यत्वे सेव्यत्वमित्यर्थः यत्तु दैत्यानित्यसेवेयातु
एतदेवोपपादयति ॥ २९ ॥ यदिति असुभिः प्राणैः वसुभिर्धनैः प्राणादिभिर्देहात्मजादिषु नृभिर्यद्युज्यते देहाद्यर्थं यत् क्रियते
इत्यर्थः तदसदसद्यर्थं भवति कुतः पृथक्त्वात् भेदाश्रयत्वात् शाखानिषेचनवत् ॥ तैरेव प्राणादिभिरीश्वरोद्देशेन यत् क्रियते

पीतप्रायेऽमृते देवैर्भगवांल्लोकभावनः ॥ पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥ एवं सुरासुरगणाः स
मदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः ॥ तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजः श्र
यणान्न दैत्याः ॥ २८ ॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ॥ तैरेव स
द्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥ २९ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे नवमोऽध्यायः ॥ ९ ॥
शुकः ॥ इति दानवदैतेया नाविंदन्नमृतं नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयित्वा
मृतं राजन्पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २ ॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दि

इत्यर्थः तत्तु सन्महाफलं भवति कुतः अपृथक्त्वात् ईश्वरस्य सर्वत्रानुगतत्वात् ॥ तत्र दृष्टान्तः यन्मूले मूलनिषेचनं
तस्य यथा सर्वस्य स्कंधशाखादेरपि भवतीति यद्वा असन्नौपचम्योः एव यं कं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्तु तद
सत् अपृथक्त्वं पर्यालोच्य ईश्वरदृष्ट्या तैरेव तेषु एव च यत् क्रियते तत्सद्भवतीति शेषं समानं ॥ २९ ॥ इति श्रीभावार्थदीपि
कायां अष्टमस्कंधे नवमोऽध्यायः ॥ ९ ॥ दशमे मत्सरादूर्ध्वं यावद्भाग्यं मथ्यसुरैः ॥ दैत्यमायाविषक्तेषु देवेष्वाविर्बभौ
हरिः ॥ तदेवममृतानाप्तिरभक्तानामिति वितं ॥ भक्तममृतं तत्र प्राणहानिः पुनः स्फुटीयते ॥ ॥ ॥ ॥

पृ॰ ३ ॥

क्रियत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रणः संग्राम उद्दन्वतः समुद्रस्यतीरे बभूव ५ ॥ अन्योन्यं समामाद्य निजघ्नुः ॥ ६ ॥ विद्यजनपदादिभिश्च वीराणां मालाभि
श्चवानिभिर्देवदानववीराणां धनिन्यो यादसां मालाभिः सागराविवेक्षन्तु विनिश्च तुणामन्वयः यादोभिर्वितिवासिनेर

ततः सुरगणाः सर्वे समथयापीनये पिताः शतिसंयुयुधर्शीसैर्नारायणप्रायणाः ॥ ५ ॥ तत्रदेवासुरोनामरणः
परमदारुणः रोदसुरन्वतोमामेस्तुमुलो लोमहर्षणः ॥ ५ ॥ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे समासा
द्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥ शंखतूर्यमृदंगानां भेरीडमरिणां महान् हस्त्यश्वर[illegible]थपत्तीनां
नदतां निःस्वनोभवत् ॥ ७ ॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः हया हयैरिभाश्चेभैः समसज्जन्त संयुगे
८ उष्ट्रैः केचिद्विभैः केचिदपरे युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥ गृध्रैः कंकैर्बकैः
श्येनैर्भासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥ शिवाभिराखुभिः केचित्कृक
लासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः सेन
योरुभयोराजन्विविशुस्तेग्रतोग्रतः ॥ १२ ॥ चित्रध्वजपटैराजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदण्डैर्व्यजनैर्बार्ह
चामरैः ॥ १३ ॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः देवदानव
वीराणां ध्वजिन्यौ पाण्डुनन्दन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥ १४ ॥ वैरोचनो बलिः संख्ये सोऽसुराणां च
मूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितम् ॥ १५ ॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनि
र्देश्यं दृश्यमानमदर्शनम् ॥ १० ॥ ॥

मल्लेरानपदे स्ववारे स्ववामरेत्रव्यजनैः स्व ॥ ७ ॥ वातेनोद्धूतैरुत्तरैरुत्तरीयैरुष्णीषैश्च स्वर्सूर्यरश्मिभिः सुतरां स्फुरद्भि
र्ल एवं टीकाः ॥ १५ ॥ असुराणां चमूः तस्याः पतिः सबलिर्यानमास्थितः ॥ १६ ॥ ॥ ॥ ॥

श्री भाग॰ स्कं॰ टी॰ ४२

डदये उदयगिरिशिखरस्थः चंद्र इव विरेजे ऽतित्रयाणामनयः ॥ १५ ॥ एवं ते निप्रस्रवणानि यस्मिन्निति मद्ध्यारासाद्र।
रूपं ॥ १७ ॥ नानावाहनादीनि येषां ते देवाश्रस्त्रा मिथो युयुधुः ॥ २६ ॥ एवं टीका ॥ २७ ॥ इन्द्रेणान्ये बाहु युयोधेति ॥ सप्तभिः ॥ अ

आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ बालव्यजनछत्राग्र्यै रेजे चंद्र इवोदये ॥ १६ ॥ तस्यासन्सर्वतो या
नैर्यूथानां पतयो ऽसुराः नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥ १७ ॥ द्विमूर्धा कालनाभोथ प्रहेतिर्हेतिरिल्व हेति २
लः शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥ १८ ॥ हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः ॥ तारकश्चक्र
जंभ ४ दृक् शुंभो निशुंभो जंभ उत्कलः ॥ १९ ॥ अरिष्टोरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेया नि
वातकवचादयः ॥ २१ ॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ॥ सर्व एव रणमुखे बहुशो निर्जितामराः २२
सिंहनादं विमुंचंतः शंखान्दध्मुर्महारवान् ॥ दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशं ॥ २३ ॥ ऐरावतं दि
युयुधे ६ क्करिणमारूढो शुशुभे स्वराट् ॥ यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २४ ॥ तस्यासन्सर्वतो देवा
नानावाहध्वजायुधाः लोकपालाः सहगणैर्वाय्वग्निवरुणादयः ॥ २५ ॥ तेन्योन्यमभिसंसृत्य क्षिपंतो मर्म ४
भिर्मिथः ॥ आह्वयंतो विशंतोग्रे युयुधुर्द्वंद्वयोधिनः ॥ २६ ॥ युयुधे बलिरिंद्रेण तारकेण गुहोस्यत ॥ वरुणो हेति
नायुध्यन्मित्रो राजन्प्रहेतिना ॥ २७ ॥ यमस्तु कालनाभेन विश्वकर्मा मयेन च ॥ शंबरो युयुधे त्वष्ट्रा सवित्रा तु
विरोचनः ॥ २८ ॥ अपराजितेन नमुचिरश्विनौ वृषपर्वणा ॥ सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च २९ राहु
णा च तथा सोमः ॥ पुलोम्ना युयुधेनिलः ॥ निशुंभशुंभयोर्देवी भद्रकाली तरस्विनी ॥ ३० ॥

सात स्वास्यान युयुधाते इत्यर्थः ॥ २९ ॥ सूर्यो देव एक एव शतेन बलिसुतैः बाणज्येष्ठा येषां तैः ॥ ३० ॥ निशुंभशुंभाभ्यां देवी भद्र ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीमहंतीन्याशोहाः तैः सहिताश्चैव्यैचराहाः एवंतके वल्लेगजादयउक्ताः कथंभूताः। निकृत्तावाहु दृयोर्याः छिन्नानिध
जादीनि येषां ते येषां दीनां पदाघातेरवयोगे चूर्णिता दायाधनाड्गा भूमेरुत्थिता वेणार्दिशाः। वंद्युमणिंच मृद्यैच्छा दः
यंल्लैदेवरूपेदेर्व्यवर्ततकथंभूताद सत्कतुतिभिः। रक्तोद्गवोः परिस्नुतान्मिक्तानयच्छापरिस्नवनादेतान्यवर्तत।

नि२

तथा कपिलजैर्नेन महिषेणा विभावसुः। रत्नलासदृशानापिर्व्वाततसुचैवविंदम ॥४३॥ कामदेवेन दुर्मर्षैरक्ता
लोमानृभिः सह ॥ वृद्धस्यातिलूशन मानवकेणाग्नानेश्वर ॥४४॥ मरुतोवातकवचैः कालेयैर्देवसेनामराः
विश्वेदेवालपौलोमैरुद्राः क्रोधवशैः सह ॥४५॥ तथेवमाजावन्योन्यं सेद्राः दैत्यसहत्यचयुध्यमानाः
अन्योन्यमासाद्य निजघ्नुर्जिगीषवस्तीक्ष्णाशयासितामवैः ॥४६॥ भुसुंडिभिश्चक्रगदाभिः पट्टिशैः
शक्तितुल्लुकैः प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः साभिंडिपालैश्रुपरिवीसिवि १
छिद्रैः ॥४७॥ वाजाश्वरथाः सवथाः प्रदानयः ॥ सावोद्गवाहादिविधाविलुंठिताः निकृत्तबाहुरुशिरो
धरास्त्रयः छिन्नध्वजेषाश्च तेनैव भूषणाः ॥४८॥ तेषां पदाघातनयाचूर्णिता दायोधनाड्गणाउत्थि
तरजसा वेणार्दिशाः वंद्युमणिंवच्छादयन्प्रवर्ततासत्कतुतिभिः परिस्नुतः ॥४९॥ शिरोभिरुद्धृताकिरीट
कुंडलैः संरंभदष्टाभिः परिदष्टदच्छदैः महाभुजैः साभरणैः सहायुधैः सायास्तृताभूः करभोरुभि

वैभी ५९ ॥

भावेकः रक्तयाधाराणांनत्यंर्यनमुच्चलनादित्यर्थः प्रथमांतपाठेरणार्विशेषणं ॥५॥ टीका एवं ॥५॥ शिरोभिर्महाभु
जेषुकरैसरशेरुरुभिश्चमावणाभूः प्रकर्षेणास्तास्तृताःसतीविभोकथंभूतैः शिरोभिः उद्धृतानि उत्पतितानि
किरीटानि कुंडलानि वयेभ्यः संरंभपुक्तार्ह्रष्टायेपुतैः परिदष्टाद च्छदादोष्ठायेषुतैः ॥५९ । ॥ । ॥

श्री
भा० पु०
२२

पतितानि यानि तस्य शिरांसि तत्र तस्यैव दैत्यैर्मिलितैः पपात इत्यर्थः उद्यतानि प्रायुधानि येषां तैर्दोर्दण्डैर्भुजैः ॥ ४० ॥ बाहूनेवावृत
नपादस्तकान् प्रारोहेगजं यंतान् विप्राख्येयत विव्याध ॥ ४१ ॥ उर्मध्ये प्रमहतान् बलिः ॥ ४२ टंकाव त्रीदगाग्रैः शिखैः

कबंधास्तत्र वान्यतुः पतितस्वशिरोयाभिः उद्यतायुधदोर्दण्डैराधावंतो भटान्मृधे ॥ ४० ॥ बलिर्महेन्द्रं दशभिस्त्रि
भिरैरावतं शरैः ॥ चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत ॥ ४१ ॥ सतानापततः शक्रः तावद्भिः शीघ्रविक्र
मः चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव ॥ ४२ ॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंतीं म
होल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः यद्यच्छस्त्रं समादद्यात्सर्वं तन्
दच्छिनद्विभुः ॥ ४४ ॥ ससर्जाथासुरीं मायामन्तर्धानगतोऽसुरः ततः प्रादुरभूच्छैलः सुरानीकोपरि प्र
भो ॥ ४५ ॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना ॥ शिलाः सटंकशिखराः चूर्णयन्त्यो द्विषद्बलं ४६ महो
रगाः समुत्पेतुः दन्दशूकाः सवृश्चिकाः सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजान् ॥ ४७ ॥ यातुधान्य
श्च शतशः शूलहस्ता विवाससः छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो ॥ ४८ ॥ ततो महाघ
ना व्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥ सृष्टो दैत्येन सुमहान्वह्नि
श्वसनसारथिः सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥ ५० ॥ ततः समुद्र उद्वेलः सर्वतः
प्रत्यदृश्यत प्रचंडवातैरुद्धूततरंगावर्तभीषणः ॥ ५१ ॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः सृ
ज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५२ ॥ न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप ध्यातः
प्रादुरभूत्तत्र भगवान्विश्वभावनः ५३

सहिताः ॥ ४८ ॥ स्तनयित्नवस्त्वंगारान्मुमुचुरित्यनुषंगः ॥ ४९ ॥ अधाक् अधाक्षीत् अदहदित्यर्थः ५० उद्धू
तैः तरंगैरावर्तैश्च भीषणः ॥ ५१ ॥ एवमेत्य सुदैत्यैः सृज्यमानासु ॥ ५२ ॥ यत्र यदा तदा तैः ध्यातः सन् ॥ ५३ ॥

२२

अथो अष्टायुधयुक्ता बाहवो यस्य श्रीकौस्तुभश्चानर्घ्यं किरीटं च कुंडले च उल्लसंति श्रीकौस्तुभादीनि यस्मिन् ॥ ५४ ॥
असुराणां कूटं कर्म मंत्रादिप्रयोगः तस्माज्जाताः महिना महिम्ना हेतुः स्मृतिरेव सर्वासां विपदां विमोक्षणं तत्र किमु
तद्धेतोः प्रवेशात् इत्यर्थः ॥ ५५ ॥ इभारिवाहः सिंहवाहः प्रहिणोत् क्षिप्तवान् लीलयैव तत् गृहीत्वा तेनाहनत् हन् ॥ ५६ ॥ हे नृप
यच्चक्रेण कृत्तशिरसौ पेततुः ॥ ततस्तथाभूतमपि आहत्य संचचार अंडजेंद्रं गरुडमहनत् ॥ तदहतेव गदया सह शिरो अच्छिनत् इत्यर्थः

ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभान
र्घ्यकिरीटकुंडलः ॥ ५४ ॥ तस्मिन्प्रविष्टेसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रति
बोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं ॥ ५५ ॥ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोद
थ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५६ ॥ माली सुमाल्यति
बलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तं ॥ आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोच्छिन
दरेर्नदतोरिणाद्यः ॥ ५७ ॥ इति श्रीभागवते अष्टमस्कंधे दशमोध्यायः ॥ १० ॥ श्रीशुकः ॥ अथो सुराः प्रत्युपलब्धचेत
सः ॥ परस्य पुंसः परयानुकंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयः तांस्तान् रणे यैरभिसंहताः पुरा ॥ १ ॥ वैरो
चनाय संरब्धो भगवान्पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥ २ ॥ वज्रपाणिस्तमाहेदं तिरस्कृ
त्य पुरः स्थितं ॥ मनस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बा
लान्निबद्धाक्षान् नटो हरति तद्धनं ॥ ४ ॥ इति श्रीभावार्थदीपिकायां अष्टमस्कंधे दशमोध्यायः ॥ १० ॥ एकादशे तु देवेषु देत्यघातिषु नारदः देवा
न्वारयच्छुक्रो मृतान्दैत्यानजीवयत् उदयच्छत् उद्यमितवान् ॥ १ ॥ निबद्धान्यक्षाणि येषां तान् बालान् जित्वा नटः कप
टवृत्तिर्यथा ॥ यथा नेत्रबंधने हरति तथा हे मूढ मायेशान् अस्मान् जेतुमिच्छसि इति भावः ॥ ४ ॥ राम ॥

श्री. भाग. स्क. ८

आरुरोहेति रथो रोधु सिंहयुक्तं तियेव डासि स्यंदनं तिष्ठलं चयतु सिंहयुक्तं तिमो हमि सिंहयुक्तं नीत्वर्थः त्रयो विष्णुनो मिपातयामि ५
कालवशानेकालं यंत्रिनेत्रेनो न हृष्यंति ॥ न तु एवं विविके सूर्यमपंडितास्त्रनिपुणाः ॥६॥ न तु कीर्तिर्जयादावात्मानं साधयेन मा।

आरुरोहेति मायाभिः मायाभिः स्यंदनं तियेदिवं ॥ नान्दस्य विष्णुनाम्यत्ता नान्यर्वस्मा ह्वपदादयः ॥५॥ सोहं हं दुर्मायिनस्तेयथ वा।
त्रुणाशनपर्वाणः ॥ शिरो हनिष्ये महात्मन ववदस्तानातिमिः सह ॥६॥ बलिः संग्रामे वर्तमानानां कालचोदितकर्म
णा कीर्तिर्जयोजयो मृत्युः ॥ सर्वेषां स्यु रनुक्रमात् ॥७॥ तमिमं कालवशानेजनाः पश्यंति स्वयं ॥ न हृष्यंति न शोच
न्ति नतत्र यूयमपंडिताः ॥८॥ न वयं मन्यमानानां आत्मानं तत्र साधनं ॥ गिरो वः साधुशोच्यानां गृह्णीमो मर्मताड
नाः ॥९॥ शुक उवाच इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः आकर्णपूर्णैर्बहुनः दास्तैपराहतं पुनः ॥१०॥ एवं निरा
कृतो देवो वैरिणा नस्य वादिना नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥११॥ प्राहरत्कुलिशं तस्मै अमोघं परमर्द धं
ने सयानो व्यपतत् भूमौ छिन्नपक्ष इवाचलः ॥१२॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः स्वहृत् अभ्ययात् सौहृदं सख्यु
र्हतस्यापि समाचरन् ॥१३॥ ससिंहवाह आसाद्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः १४
गदाप्रहारव्यथितो भृशं प्रविह्वलितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं चपरं ययौ ॥१५॥ ततो रथो मातलि
ना हरिभिर्दशशतैर्वृतः आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥१६॥ तस्य तन्पूजयन् कर्म यंतुर्दानवसत्तमः
शूलेन ज्वलता तं तं स्मयमानोऽहनन्मृधे ॥१७॥ सेहे रुजं सुदुर्मर्षां सत्वमालंब्य मातलिः ॥ इंद्रो जंभस्य संक्रुद्धो वज्रे
ण पाहरच्छिरः ॥१८॥ जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ॥ नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः १९
न्यमानानो वाणिरो नगृह्णीमः मर्मसुताडयंत्यादिप्रलाः २० विभुमिंद्रकुशाः ॥२१॥ सयानः ॥ विमानसहितं ॥२२॥ नमु
चिर्बलिः पाकश्चेति त्रय आजग्मुः ॥ त्रयाणां एषां विक्रमानाह ॥ २३ ॥ ॥ ॥

२८

इं ११ नोत्रमं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हरीतितिक्षिभिः हर्यश्वस्येंद्रस्य तावद्भिर्दशशतैः शरैः ॥२१॥ आहत्यरुद्ध्वा विद्धा २३ ॥ आविद्धालीनं सूर्यं ॥२४॥ वणि
क्पथाः वणिजां भिन्ना नौर्येषां ते भिन्नानाव दृष्टान्तः ॥२५॥ तुराषाडिंद्रः स्वश्वादिसहितो विनिर्गतः स्वग्रणीः

वचोभिः परुषैरिंद्रमर्दयंतोस्य मर्मसु । शरैरवाकिरन्मेघा धाराभिरिव पर्वतं ॥२०॥ हरीन्दश
शतान्याजौ हर्यश्वस्य बलः शरैः । तावद्भिर्दयामास युगपल्लघुहस्तवान् ॥२१॥ शताभ्यां मातलिं
पाको रथं सावयवं पृथक् । सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥२२॥ नमुचिः पंचदशभिः
स्वर्णपुंखैर्महेषुभिः । आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥२३॥ सर्वतः शरकूटेन शक्रं सरथसा
रथिं । छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदः ॥२४॥ अलक्षयंतस्तमतीव विह्वला विचुक्रुशुर्दे
वगणाः सहानुगाः । अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथार्णवे २५ ८
ततः तुराषाडिषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः । बभौ दिशः खं पृथिवीं च रोचयन्स्व
तेजसा सूर्य इव क्षपात्यये ॥२६॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे । उदयच्छद्रिपुं हंतुं वज्रं व
ज्रधरो रुषा ॥२७॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः । ज्ञातीनां पश्यतां राजन् जहार जनय
न्भयं ॥२८॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः । जिघांसुरिंद्रं नृपते चकार परमोद्यमं ॥२९॥ अ
श्मसारमयं शूलं घंटावद्धेमभूषणं । प्रगृह्याभ्यद्रवत्क्रुद्धो हतोसीति वितर्जयन् ॥३०॥ प्राहिणो
द्देवराजाय निनदन्मृगराडिव ॥३१॥ तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः
सहस्रधा । तमाहनन्नृप कुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ॥३२॥ न तस्य हि
त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः । तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो

सारथिः ॥२८॥ शोकामर्षाभ्यां पूर्णो रुषा क्रोधेनान्वितः ॥२९॥ घंटावद्घंटाभिर्युक्तं ॥३०॥ अतिवीर्यं वृ

[illegible]

॥ २१ ॥ [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भग टी ५४

पतत्रैः पतैः॥ २४॥ सारमयं वीर्याधिकं त्वाष्ट्रं तपः सर्वं वृत्रः सेयेन वेणामया विपाटितः॥ २५॥ ब्रह्मतेजः दधीचेः सामर्थ्यं
२६ प्राद्युम्नस्याभ्यां॥ २७॥ मन्युर्नैवेति॥ २८॥ उभयात्मत्वमेवाह॥ न शुष्केण नचार्द्रेण फेनेन याव छेदितः अपांफेनेन नमु
न समादिष्टो विभिन्ना बोर्बत्नः प्रतिहतोयतः किमि॥ देवयोगेन भूतं लोकविमोहनं॥ ३३॥ येनैव एवं महद्वी
णांपतत्रैर्दृष्टेत्नान्यये॥ हतानि विशतानां भावैः पतत्रैः पततां भुवि॥ ३४॥ तपः सारमयं त्वाष्ट्रं वृत्रोयेन।
विपाटितः अन्येचापि बलोपेताः सर्वास्त्रैरक्षततनवः॥ ३५॥ सोयं प्रतिहतो वज्रो मया मुक्तोसुरेल्पके नाहं त
दाददे दंडं ब्रह्मतेजोप्यकारणं॥ ३६॥ इति शक्रं विषीदंतं आह वागशरीरिणी॥ नायं शुष्कैरथो नार्द्रैर्वध
महतिदानवः॥ ३७॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः॥ अतोन्यश्चिंतनीयस्ते उपायो मघवन् रिपोः॥ ३८
[illegible] तां दैवीं गिरमाकर्ण्य मघवान् सुसमाहितः॥ ध्यायन्फेनमथा
पश्यदुपायमुभयात्मकं॥ ३९॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः तं तुष्टुवुर्मुनिगणा माल्यैश्चावा
किरन्विभुं॥ ४०॥ गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा॥ ४१॥ अ
न्येप्येवं प्रतिद्वंद्वान् वाय्वग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा॥ ४२॥ ब्रह्मणा प्रेषि
तो देवान्देवर्षिर्नारदो नृप॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं॥ ४३॥ नारद भवद्भिरमृतं प्राप्तं ना
रायणभुजाश्रयैः श्रिया समेधिताः सर्वे उपारमत विग्रहात्॥ ४४॥ शुकः संयम्य मन्युसंरंभं मानयंतो
मुनेर्वचः गीयमानानुचरैर्ययुः सर्वे त्रिविष्टपं॥ ४५॥ येवशिष्टा रणे तस्मिन्नारदानुमतेन ते॥ बलिं विप
न्नमादाय अस्तंगिरिमुपागमन्॥ ४६॥ तत्राविनष्टावयवान्विद्यमानशिरोधरान् उशना जीवयामास सं
जीविन्या स्वविद्यया॥ ४७॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः पराजितोपि नाखिद्यल्लोक
वेः शिरश्छेदोप्रवर्तयत इति॥ ४८॥ अनुचरैः रूपगीयमाना इत्यर्थः उपगीयमाना नेत्यनुचरैः॥ सहस्ति वा॥ ४९
प्रविनष्टा अवयवा येषां विद्यमाना शिरोधरा येषां तान्॥ ४७॥ प्रत्यापन्ना निवृत्ताः प्राणा इंद्रियाणि स्मृतिश्च ये

त्वयि किंचिन्न वाश्चर्य्यं वयं त्वाश्चर्य्यमानसाः इति वदन्महादेवस्तुष्टाव हरिमष्टभिः ३

इति श्रीभावार्थदीपिकायामष्टमे एकादशः ॥११॥ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकं भवं संमोहयामास हरिः पुनरमोहयत् ॥ अमृतमन्नभूतमाविर्भावितं सोमपायिनां तद्भुक्तं ॥ इति वक्ष्यमहादेवमोहप्रसंगसमुपवर्णनेन हरिः सोममपाययदिति उदितं निशम्य सत्यजत्रालेन यत्रातद्रूपं द्रष्टुं ययावित्यन्वयः ॥ सोमया उमया सह ॥ त्वयि महामाया विनिपतिरस्त्रेव न हि किंचित्किंविद्योदितं भिव वयं न परमकौतूहलेन द्रष्टुमायाता इति वक्ष्यमाणं बोधयन्स्तौति ॥४॥ देवदेवेत्यादि देवानां देवस्यन तत्राह [illegible] हे जगद्व्यापिन्कुतः हे जगन्मय नहि किं प्रथ

इति श्रीभागवते महापुराणे अष्टमस्कंधे एकादशोऽध्यायः ॥११॥ बादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् । मोहयित्वा सुरगणान्हरिः सोममपाययत् ॥१॥ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः । सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥२॥ सभाजितो भगवता सादरं सोमया भवः । सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिम् ॥३॥ महादेवः ॥ देवदेव जगद्व्यापिन् जगदीश जगन्मय । सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥४॥ आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः । यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥५॥

नेन ॥ हे जगदीश अतएव कुतः न त्वाह सर्वेषामपि भावानां हेतुः स्रष्टा ईश्वरः आत्मत्वात् तत्तदंतर्यामी च ततश्च न भिन्न इत्यर्थः ॥४॥ ननु जगन्मयत्वात् जगतः अन्यत्वादिना सन्नैव न च जगत् अन्यत्वादिना चममापि किं तथा नेत्याह आद्यन्तावि जगतो मध्यं च यस्य जगतो कालाणि भवंति सर्वाणि वा यस्य ये तानि अवयवमध्यानि न संति यच्च बहिः इदं कार्यस्यदृश्यमहं कोर्तास्यदेहबहिर्भोग्यं अन्यद्भोक्तृ चेतनं स्तं च चिद्रूपं भवान् ॥ अतोऽनंतत्वविकारादिशंके ।

श्रीदे॰ चा॰ त्यर्थः ५ ॥ दुदे॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग ८ टी० २४

दपने ५

तदेवंभूतस्य मम तत्वं नामावादः प्रमाणं इत्याह तदेवेति उभयतः इहामुत्र च संगं त्यक्त्वा ॥ ४ ॥ तद्ब्रह्मेति वृद्धं दुहं तत्वं संसारो दासीनस्य मम च वर्णाभोजोपासनया किंतेनैव नाशदत्वमिति ब्रह्मत्वेपि विनात्यंतमुदासीनः किंतु विश्वप्रपंच स्योत्पत्यादीनां हेतुः तस्याधीनः मात्मनां जीवानामीश्वरश्च त्वंतत्कालवतां तदपि किंमात्मादिव क्षयामुपेत्य वोभिवेकेभ्यः फलेद्दाभिर नहिनहिश्च नपेत्य एवं तत्रहि किमीश्वरत्वेन न चाह तेनानमिः तन्म तदानाथ्यमपेक्ष्य तिनरपेक्षः तस्य भावः तदपेक्षतातया पूर्णपदान मेवदर्शयति तेन तदीयं ब्रह्मत्वं विशिनष्टि पूर्णमि त्यनेन विशेषं तद्रूपं विषयसखं वेत्तत्वदास्या हमात्मविकारेति नित्यमानंदमात्रं च यतः विशोकं तन्मूलः विगुणंकिंच अनन्यत न वियते ग्रन्यय स्मात ब्रह्म व्यतिरिक्ताभावादपि नियतेद्भवामित्यर्थः तर्हि सर्वात्मकत्वेन न्नाहि कार

॥३॥ तवैव चरणांभोजं श्रेयःकामा निराशिषः ॥ विसृज्योभयतः संगं मुनयः समुपासते ॥ ४ ॥ त्वं ब्रह्म पूर्णममृ
॥४॥ तं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् ॥ विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्व
॥५॥ रश्च तदपेक्षतयानपेक्षः ॥ ५ ॥ एकः त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ॥ अज्ञा
नतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ॥ ६ ॥ त्वां ब्रह्म केचिदवयंत्यु
तधर्ममेके एके परं सदसतोः पुरुषं परेशं ॥ अन्ये वयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषम यथमात्मनि

व्ययं गेतद्दशी त्वंत्वाद त्वयनस्वंनो व्यतिरिक्तं वकारणत्वान ॥ नैवंभूतस्यात्मतत्वं कब्रह्मस्वरूपस्य न वान्यापे तास्ति यतः केवलं भक्तानुग्रहार्थमेव न तवैश्वर्यं न स्वार्थमित्यर्थः ॥ ५ ॥ त्वमेवमेकत्वं स्पष्टयन् इत्याशं कायां दृष्टांतेनोपपादयति सदसत्कार्यं कारणरूपं द्वयम द्वयं च परमकारणं त्वमेवैकः कृताकृतं कुंडलादिरूपं द्व यमकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेहत्वमिति व स्तुतो भेदो नास्ति कथं तर्हि भेदप्रतीतिरस्ति त्राह अज्ञानतस्त्विति कुतः यस्माद्विरूपाधिकस्यैव तव वाऽयं गुणव्यतिकरो भेदेन स्वतः ॥ ६ ॥ अतएव त्वां बहुधाव दंतीत्याह त्वामिति केचिदुपनिषदावेदांतिनोऽवयंति मन्यंते त्वा मेवधर्ममीमांसका मन्यते प्रकृतिपुरुषयोः परं पुरुषमो सं सांख्याः मन्त्रोक्तविधिज्ञानक्रियायाः

नाथ हृदीशस्त्वमीशानाभूतग्रहाचेत्येवं नवशक्ति युक्तं परं परं च राज्ञः महापुरुषपातंजलाः ५ ॥

परात्पुर्वेत्मा सन्त्रसर्गाः सत्वगुणेन सृष्टा अपि येन त्वया विविविचितं विश्वमपि खलु न ब्रनो न जानन्ति किं पुनस्त्वां हे ईश
अभंद्रा न संतामसे वहनं उत्पन्नि अयेषां तेन न जानन्तीति किं मुवक्तव्यं ॥ ११ ॥ किं न वस सर्वज्ञाना सीत्याह सत्त्वं सर्वं अवकन्तसेवा
यो विज्ञाना वि किं नत्सर्वं समीहितं स्वकृतं अदः स्थिति जन्मनाशं अत्र सुखा जगतो जन्मादिभूतानामीहितं जगतो
भव बंधं च मोक्षं च यथा मीरोष्टा नः चराचरा ख्या देह नान्तं च यथा वायुरा विशाति तेद्यं काय भव कन्न्तेन

नाहं परा पुर्ज्ञेषयो न मरीचिमुख्या जानन्ति यद्धि रचितं खलु सत्त्वसर्गाः ॥ यन्माययामुषितचेतस ई
प्रेतस्य मर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥ ११ ॥ सर्वस्मीहितमदः स्थिति जन्मनाशं भूते हितं च जगतो
भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतया वगमोवरुन्त्से ॥ १२ ॥ अवतारा
मयाप्यारममाणस्य ते गुणाः ॥ सोहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतं ॥ १२ ॥ येन संमोहिता दैत्याः
पायिताश्चामृतं सुराः ॥ तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥ शुकः एवमभ्यर्थि
तो विष्णुर्भगवान् शूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ कौतूहलाय दैत्या भग
नां योषिद्वेषो मया धृतः पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेहं दर्शयिष्यामि दिदृ नुवा
क्षोः सुरसत्तम कामिनां बहु मंतव्यं संकल्पप्रभवोदयं ॥ १६ ॥ शुक इति ब्रुवाणो भगवांस्तत्रैवांतर च
धीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विविधपुष्पारुणपल्ल
वद्रुमे ॥ विक्रीडितां कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलां ॥ १८
दात्मकतयातस्य सर्वस्यात्मतयेत्यर्थः आत्मैवेहन्तु रवगामः ज्ञानरूप इति ॥ ११ ॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति
अवताराइति द्वाभ्यां ॥ १२ ॥ सुरकार्याणि योषि द्वेषेण भविष्यनीति पश्यता अयं भावः अवश्यं तावद्दुर्न्मं दैत्या
ने वयि त्वा देव भो सूतदयन वैवेवैषस्य रूपान्तूरेक नैगुचितं अतो वचन मोहनादि सारं कामिनीरूपं मया धृ
तमिति ॥ १५ ॥ तदूपं दर्शयिष्यामि संकल्प प्रवः कामः न स्यादयो यस्मात् ॥ १६ ॥ विविधानि पुष्पाणि अरु

ताः पल्लवाश्च येषां ते द्रुमा यस्मिन् लसद्दुकूलेन पर्यस्ते परि
वृते नितंबे मेखला यस्याः ताम् १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जयतत्१

तीति चेत्तत्राह न तद्दानमिति ॥३६॥ तपः चित्तैकाग्र्यं कर्म एतन्न तु तद्दिश प्रतिश्रुत्यनेति कथमन्यत्तं वाच्यं तत्राह ॥३७॥ ॥ ॥ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्थः ॥ अत्रापि सत्यानृतं न व्यवस्थाया बहूक्त श्रुत्यादि प्रश्न ओमिति सत्येन इति श्रुतं तमित्यादिना सत्यानृतयो
र्लक्षणपूर्वकं स्तुतिनिंदाभ्यां सत्यं विहितं अनृतं च निषिद्धं अनेन तेऽपरा गवा एतद्विक्रमतः त्वमित्यादिना सत्यैषा ॥
न नृतेन वाग्गुणानुक्त्वा तस्मात्केवलं प्रवदेयात् कालेन वदेयात् न तस्यानृतेन मिथुनी करोति इत्युपसंहारेणानृतं निषे
कराद्विश्वा अनृतं च प्रवृत्तानेनमिमं श्रुत्यर्थं द्वितीयपादेनाह ॥ ओमित्येतं नीकारेणायत्तौ अंकेन तत्सत्यमेव नियदाह
तदेवानृतं तु सत्ये विषदनृतं विनाननिप्रश्नतोव्याप्येनाह ॥ २१ ॥ सत्यं पुष्पफलं विद्यात् जानीयात् आत्मवृक्षस्य देहरू
स्य वृक्षस्य कृतः गीयते श्रुत्या व्याख्यातेत्यर्थः पादांतं वं सुगमे यद्यपि श्रुत्या वाचः सत्यं पुष्पफलं चेत्युक्तं तथापि वाचो देह
निर्वाहं स्थितन्वात् आत्मवृक्षस्य निःश्रेयसतानुसारेण अस्तु भवतु पुष्पफलस्थानीयं सत्यं ततः किमतः आह वृक्षे देहे जीवति न

अत्रापि वहू वै वीतं श्रणुमे स्वरसत्तम ॥ सत्यमेवासि नित्यस्यात्मं यत्नेत्याहोनृतं हितन ॥ २२ ॥ सत्यं पुष्पफलं विद्या।
दात्मवृक्षस्य जीवनः । वृक्षे जीवति नित्यं । अस्याद्वृत्तं मूलमात्मनः ॥ २३ ॥ तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्तते विरा
त् ॥ एवं नष्टोनृतः सद्य आत्मा शुष्यत्य संशयः ॥ २४ ॥

पुष्पफलं न स्यात् । मानस्यादिति पाठे श्रुत्युक्ता यां वाचः परामर्शः देहस्यानृतेन वृक्षत्वीयमित्याह ॥ अनृतं वाक्मनो देहस्य मूलं
॥ २५ ॥ एतदेव स्पष्टीतेन स्पष्टयति यथा वृक्ष उन्मादितमूलः शुष्यत्य विरादेवो हर्तते पतति च ॥ एवं नष्टमनृतं यस्य स आत्मा
शुष्येत् २ देहः नश्यते यद्यपि च श्रुत्या एवमेवानृतं वदन् आत्मानमाविर्मूलं करोतीत्येव निंदयानृतं निषिद्धं तथाप्युपसंहारा
नुसारेणतत्केवलानृतविषयमित्यभिप्रेत्यैव व्याख्यातं दृष्टेनैने नियतयेवाह ॥ तथा च श्रुतिः ओमिति सत्यं नेत्यनृतं
तत्र पुष्पफलं वाचो यत्सत्यं महेश्वरो यशस्वी कल्याणकीर्तिर्भविता ॥ पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मू
लं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नात्मानमाविर्मूलं करोति स शुष्यति स उ
द्वर्तते तस्मादनृतं न वदेत् दयेत त्वेनेनेति अनृतेन तदयत संकोचः आत्मानं रक्षेदिति श्रुत्यर्थः ॥ २६ ॥

तेन उद्वर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ८

सर्वेषामन्यवचनेदहानविर्वदेदितिस्फुटीकर्तुमनृतस्यदोषाननृतस्यगुणानाह। पराग्रीतिद्वाभ्यां यदोमित्यनृतंतेनत्य
क्तः सर्वंगृहीत्वा गच्छतीति परवञ्चकविक्षामितिभावस्यपदस्यर्थाख्यानमपूर्णमिति ॥४०॥ तत्रसर्वदर्थिनेयत्किंचिदोमि
तिदास्यामीतिब्रूयात्तेनतविख्यातेनत्यक्तोभवेत्। किंबभिद्दत्वेसर्वमोंकुर्वन्नदास्यामीत्यंगीकुर्वन्नयात्मनेकामेनतालप
योऽनेनभवतितस्यभोगानसिद्ध्यन्तीत्यर्थः। तथाचश्रुतिः पराग्वाएतद्रिक्तमक्षरंयदेतदोमितितद्यत्किंचोमित्याहैवास्मै
तद्रिच्यतेसयत्सर्वमोंकुर्याद्रिच्यादात्मानंकामेभ्योनलंस्यादितिनेतियत्वनृतेवचएतत्पूर्णमप्यर्थेत्यस्याभावानृतमभ्यात्मंभव
तिचकारान्वयः आत्मनोभिमुखमन्यस्यार्थंलाकर्षतीतिभ्यात्मंयोहिनित्यंसमकिंचिदपिनास्तीतिसीदामीतिवृतेस
हितेनानृतेनैवधामर्थानाकर्षतीतिप्रसिद्धं॥४१॥ ननुतर्हिइदमस्तन्वत्सर्वदासेव्यंस्यादितिनेत्याहसर्वमिति। तथाचश्रुतिः

पराग्रिक्तमपूर्णंवाएतदक्षरंयदेतदोमिति। तयत्किंचोमितिब्रूयात्तेनरिच्यतेवैपुमान्॥४२॥ सिद्धत्वेसर्वमोंकुर्व
न्नात्मनेकामेनचात्मने। अथैतत्पूर्णमभ्यात्मंयच्चनेत्यनृतंवचः॥४३॥ सर्वंनेत्यनृतंब्रूयात्सदुष्कीर्तिःश्वस
नतः स्त्रीषुनर्मविवाहेषुवृत्त्यर्थेप्राणसंकटे॥४४॥ गोब्राह्मणार्थेहिंसायांनानृतंस्याज्जुगुप्सितं॥४५॥ ३

इतिश्रीभागवतेअष्टमस्कंधेएकोनविंशः॥१९॥

अथैतत्पूर्णमभ्यात्मंयच्चनेतिसत्यमन्यंवेनेति [illegible] ब्रूयात्पापिकास्यकीर्तिर्जायते। सएनंतत्रैवहन्यादिति। अतोऽनृतेसं
कटेदिष्वनृतेनदोषायेत्युपसंहरति। स्त्रीषुप्रोत्साहनेनवशीकारेनर्मणिपरिहासेविवाहेचवरादिस्तुतौ॥४४॥ गवांब्रा
ह्मणानांचहि [illegible] नार्थेहिंसायांवकस्यचित्प्राप्तायां तथाचयाज्ञवल्क्यः। वर्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदे
दिति। तथाचश्रुतिः तस्मात्कालेएवदद्यात्कालेनदद्यात्सत्यानृतेमिथुनीकरोतीति॥४५॥ इतिश्रीभावार्थदीपिका
यामष्टमस्कंधेएकोनविंशोऽध्यायः॥१९॥ विंशेत्वनृतभीतोऽसौज्ञात्वापिकपटंहरेः। ददावेवबलिर्विष्णुः सहसा [illegible] व।

॥ श्रीमद्भागवत ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भावनात् यत्प्रोक्तं सत्यं किं तत् । योर्थकामादिकं न बाधेत स गृहमेधिनां धर्म इति ॥ २ ॥ कथं प्रत्याचक्षे निराकरोमि ॥ ३ ॥ ननु प्रत्या
ख्याने दोषः उक्तः । नजाह नाहमिति । अधन्यात् दारिद्र्यात् स्थानच्यवनात् मृत्योरपि ॥ ५ ॥ किं च यद्यद्धास्यति कं तत् सर्वं संपरेतं मृतं पुरुषं हास्य
ति त्यक्ष्यत्येव न त्विति जीवन्तं वस्तु यन्न देयमिति भावः । तथापि तावद्वृत्तिसंकटपरिहारार्थमर्धं दीयतामिति चेत्तत्राह
तस्येति । विप्रश्चेत्तेनार्धेन दत्तेनापि न तुष्येत तर्हि तस्यार्धस्य त्यागे दाने किं निमित्तं न किंचित् ॥ याविता दत्स्य यदा ।

शुकः । बलिरेवं गृहपतिः कुलाचार्येण भाषितः । तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुं ॥ १ ॥ बलिः । सत्यं भग
वता प्रोक्तं धर्मोयं गृहमेधिनां । अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥ २ ॥ स चाहं वित्तलोभेन प्रत्याचक्षे
कथं द्विजं । प्रतिश्रुत्य ददामीति प्राह्रादिः कितवो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियं । सर्वं वोढु
मलं मन्ये ऋतेऽलीकपरं नरं ॥ ४ ॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् । न स्थानच्यवनान्मृत्योर्यथा
विप्रप्रलंभनात् ॥ ५ ॥ यद्यद्धास्यति लोकेस्मिन् संपरेतं धनादिकं । तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चे
त् ॥ ६ ॥ श्रेयः कुर्वंति भूतानां साधवो दुस्त्यजासुभिः । दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥ यैरियं बु
भुजे ब्रह्मन् दैत्येन्द्रैरनिवर्तिभिः । तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥ ८ ॥

ते विप्रस्यासंतोषेणादानं स्वर्ग्यमेव स्यादतः न त्वावित्तं सर्वं देयं न वा किंचिद्देयमिति भावः । तर्हि न देयामिति चेन्न
त्याह श्रेय इति ॥ ७ ॥ दुस्त्यजैरसुभिः प्राणैरपि को विकल्पो विचारः ॥ ७ ॥ दैत्येन्द्रैर्युद्धे अनिवर्तिभिः यैर्भूर्बुभुजे उपभु
क्ता । तेषामिहलोकोन्यलोकाश्च भोगानिति वा कालो ग्रसीत् भक्षितवान् । न तु तैर्भुवि यशोऽधिगतं प्राप्तं ।
यशो ग्रसीत् । अतः कीर्तिरेव साध्या न । दीयतामिति भावः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
प्र टी
८१

देहत्यागादपि पुनर्गर्भे कीर्तिर्भवतीत्याह ॥ सत्त्वमाह इति ॥ तं तु त्यजेतीति तत्याजेति यदा तेन पात्रेणोनोति तच्च बोधनन्यायात एवमुया कार्यमिति भावः ॥ ४ ॥
देहत्यागाद्यपि पुनर्गर्भो कीर्तिर्भवतीत्याह सत्त्वमाह इति तं तु त्यजेतीति तत्याजेति पात्रेणोनोति ३ बोधनन्यायात् एवमुया कार्यमिति भावः ॥
नर्हि तियवनेन दैवमयाद्यपि तिवेनत्राहमनविन इति ॥ याहयुगं ताहशानामप्यर्थिनां कामापयेन कामान् पूरणेन इत्यर्थः ॥ मितियन्नक्षोभ
नेभद्देव भवाह शानांतकामापनयेन न तु तिर्यंः ॥ क्षोभनमिति किं पुनर्वक्तव्यमित्यर्थः ॥ ७ ॥ नायं वद्रुः किंतु विसृष्टस्तव शात्रु ॥ दिग्

मुक्तमायुधि विपर्येषु निवृत्तानामनुत्यजः ॥ ततयानीर्थमायानेषु यत्येनतत्यजः ॥ ५ ॥ मनस्विनः कारुणिकस्य शोभनं यद
र्थिकामोपनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटो यत्सदाभि वांछितम् ॥ ६ ॥ यजं तियतत्क्रतुभिर्यमाहताम
वंतमाम्नाय विधानकोविदाः ॥ सएव विसुर्वरदोस्तु वापवोदास्याम्यमुष्मादिति मीप्सितं मुने ॥ ७ ॥ यद्यप्यसावधर्मेण मवि
श्रीयाहत्ताननं ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुं ॥ ८ ॥ एष वा उत्तमश्लोको न जिहासति यद्यशः ॥ हत्वा मैनां हरेद्युद्धे
शयीत निहतो मया ॥ ९ ॥ शुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसंधं मन
स्विनं ॥ १० ॥ दृढं पंडितमान्यज्ञः स्तब्धोस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ ११ ॥ एवं शप्तः
स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकं ॥ १२ ॥ विंध्यावलिस्तदागत्य पत्नी जालक
मालिनी ॥ आनिन्ये कलशं हैममवनेजन्यपां भृतं ॥ १३ ॥

तर्हि सत्यमेव दास्यामीत्याह यजंतीति यं कं शत्रुर्वाभ्स्तु ॥ ११ ॥ यद्यपि यशोनजिहासति तर्हि युद्धे मां हत्वा एनां भूमिं हरेत् शा
यीत वा स्वयं कुत्रातः ॥ समम वितेशयीतेति वा स्तवार्थः ॥ १२ ॥ अश्रद्धितं अतश्रद्धं ॥ १४ ॥ जालकं मुक्ताभरणविशेषः तन्मा
लवतीस्त्रिवते जननीनाम्रपा भृतं पूर्णं ॥ १७ ॥

७८

त्वा॰

प्रवर्धतवोस्थानः प्रतिगृह्यनामितिवलिनाप्र्वमुक्तां त गुणत्रयमान्मनियस्यनत ॥ प्रनपंवंभूर्वमादयोयास्मि
नस्थामोस्यितनंतनः ॥२१॥ समुनिगणादिसहितो वलिः नस्यदेवं कोयएतमदिदर्श ॥२२॥ तेदेवप्रपंचयतिवमामिति

यजमानःसदातस्यश्रीमत्पादयुगंमुदा अवनिज्यावहन्मूर्ध्नितदपोविश्वपावनीः ॥१८॥ तदासुरेंद्रंदिविदेव
तागणागंधर्वविद्याधरसिद्धचारणाः तत्कर्मसर्वेपिगृणंतआर्जवंप्रसूनवर्षैर्ववृषुर्मुदान्विताः ॥१९॥ नेदुर्मु
हुर्दुंदुभयःसहस्रशोगंधर्वकिंपुरुषकिन्नराजगुः मनस्विनानेनकृतंसुदुष्करंविद्वानदाद्यद्रिपवेजगत्त्रयं
२० तद्वामनंरूपमवर्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकं भूःखंदिशोद्यौर्विवराःपयोधयःतिर्यङ्नृदे
वाऋषयोयदासत ॥२१॥ कायेवलिस्तस्यमहाविभूतेःसहर्त्विगाचार्यसदस्यएतत् ददर्शविश्वंत्रिगुणंगुणा
त्मकेभूतेंद्रियार्थाशयजीवयुक्तं ॥२२॥ रसामचष्टांघ्रितलेथपादयोर्महींमहीध्रान्पुरुषस्यजंघयोः पत
त्रिणोजानुनिविश्वमूर्तेरूर्वोर्गणंमारुतमिंद्रसेनः ॥२३॥ संध्यांविभोर्वाससिगुह्यऐक्षत्प्रजापतीन्जघने
आत्ममुख्यान् नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिचर्क्षमालां ॥२४॥ हृद्यंगधर्मंस्तनयोर्मुरारे
र्ऋतंचसत्यंचमनस्यथेंदुं श्रियंचवक्षस्यरविंदहस्तांकंठेसामानिसमस्तरेफान् ॥२५॥ इंद्रप्रधानानम
रान्भुजेषुतत्कर्णयोःककुभोद्यौश्चमूर्ध्नि केशेषुमेघान्श्वसनंनासिकायामक्ष्णोश्चसूर्यंवदनेचवह्निं ॥२६॥
प्ल॰

पत्यानेःसप्तभिः मारुतेनगणेनवायुमेवंइंद्रस्यसेनायस्यसइंद्रपदेस्थितवान् ॥२७॥ पेतत्प्रात्मास्वयंवलिर्दृश्यो
यथानानाकरूपंपश्यति ॥२८॥ श्रेणहेराजनसमस्तरेफाश्वशाद्वान् ॥२५॥ यौश्चयोच ॥ २६ ॥ ॥ ॥

मालीनद॰

दसेवसेने ॥२८॥ रेतसो रेतसि क्रमणेषु पादन्यासेषु ओषधिजातयश्च ॥२९॥ प्राणेष्विंद्रियेषु सर्वात्मनीत्यादि श्लोकं ता
नवं ॥३०॥ सुदर्शनादीनामीशं उपतस्थुरित्युत्तरेणान्वयः ॥३१॥ विद्याधरसंज्ञोऽसिः ॥३२॥ स्फुरंति किरीटादीनि यस्य
सः मधुव्रतानां स्रजो यस्यां तया वनमालया श्रीवत्सादिभिश्चावृतो व्याप्तः ॥३२॥ उरुक्रमत्वमेवाह क्षिति

वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर
एव लोभं ॥२८॥ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं छायासु मृत्युं हसिते च मायां
तनूरुहेष्वोषधिजातयश्च ॥२९॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च प्राणे
षु गात्रे स्थिरजंगमानि सर्वात्मनीदं भुवनं निरीक्ष्य ॥३०॥ सर्वेऽसुराः कश्मलमापुरंग सुदर्शनं चक्रम
सह्यतेजः धनुश्च शार्ङ्गं स्तनयित्नुघोषं पर्जन्यघोषो जलजः पांचजन्यः ॥३१॥ कौमोदकी विष्णु
गदा तरस्विनी विद्याधरोऽसिः शतचंद्रयुक्तः तूणोत्तमावक्षयसायकौ च सुनंदमुख्या उपतस्थुरीशं स्फु
रत्किरीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांबरैः मधुव्रतस्रग्वनमालया वृतो रराज राजन्भग
वानुरुक्रमः ॥३२॥ क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः पदं द्वितीयं क्रमतस्त्रिवि
ष्टपं न वै तृतीयाय तदीयमण्वपि ॥३३॥ उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥३४॥ इ।

मिति द्वितीयं पदं क्रमतो विस्तिपतः त्रिविष्टपं व्याप्तं नदीयं नाभूत् तृतीयाय तु नाकिंचिदपि न शेषं स्थितं ॥
३३ उरुक्रमस्याङ्घ्रिर्विष्टपादुपर्युपरि गच्छन्महर्जनाभ्यां तपसः च परं सत्यलोकं गत इति ॥३४॥ इति श्री
भावार्थदीपिकायामष्टमे विंशोऽध्यायः ॥२०॥ ॥ ॥ ॥ ॥ ॥ ॥

एकविंशे स्य मूर्तिमिवैएव बलिर्वं धनम् विष्णुनाक्रम्य तत्कर्म तस्य ह्नापयितुं जने ॥१॥

उरुक्रमस्यांघ्रि सरोरुहः परं दैत्युरुक्तं ततः किंन्वतं तदाह सर्वेषु सप्त लोकेषु अनंतमं घ्रिसमीरस्य प्रभवो ब्रह्माण्ड
गात् मरीचि मिश्रादयस्तु निहृयो रवयः कयं भूतोद्भवः हेरवरवैर्नरवाप्वैदवः गैहेना स्वधाम्नो द्युनिर्यस्य सः
स्वयं चैतेन नावृतः कृतः हेनरदेववृहद्धनायो गानस्य ॥ ये गानि शिलादीनि पुराणानि तत्संहितासु यागसमीरः
योगवायुस्तेन दीपितेन ज्ञानमेवाग्निस्तेन वंधितं दग्धं कल्मषं कर्मफलं येषां ते ॥ सर्वे तमंघ्रिं वबौरिव यस्य श्री

मुरुकः ॥ सर्वसमीरसाद्भवो नरवेंदुभिर्हसत्स्वधामद्युतिवावृतो भ्ययगात् ॥ मरीचिमिश्राऋषयो हृदृ
नः सनंदनाद्यानवदेवयोगिनः ॥ वेदोपवेदा नियमानयन्विता नकैतिहासोथ पुराणसंहिताः ये चा
परे योगसमीरदीपित ज्ञानाग्निना रंधित कर्मकल्मषाः ॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धा
मगता अकर्मकं ॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोर्हणोदकं ॥ समर्च्य भक्त्याभिगृ
णानशुचिश्रवायन्नाभिपंकेरुहसंभवः स्वयं ॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनप
वित्रतयानरेंद्र ॥ स्वर्धुन्यभून्नभसि सापततीनिमार्ष्टि लोकत्रयं भगवतो विशदेवकीर्तिः ॥ ब्रह्मादयो
लोकनाथाः स्वनाथाय समादृताः सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ तोयैः समर्हणैः स्र
ग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिलाजाक्षतफलांकुरैः ॥ ॥

वामनविष्णोः स्मरणानुभावतः ध्यानेस्मरणप्रसादतः अकर्मकं कर्मभिरप्राप्यं विष्णोरंघ्रये ॥ स्वयं यस्य नाभि
पंकेरुहसंभवः तस्य श्रीविष्णोरंघ्रिं समभ्यर्च्य यत् लोकत्रयं निर्मार्ष्टि पवित्रयति ॥ संक्षिप्तात्मविभूतये संहृतात्म
विभूतिः ॥ स्वविक्रान्तवीर्येण तस्मै यथाप्युर्वं वामनरूपेण स्थितायेत्यर्थः ८७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
दी
८२

त्रिपदविक्रमया व्याजयाञ्चाकपटया ज्ञातया स्वयं सर्वे बलिर्दानवस्य मही हृता दृष्ट्वा ऊचुः ॥ ६ ॥ किं मृत्युं तदा हन्तवा इति
जवनैर्नयशाहैः शुंखवडुदुभिति स्वनैः ॥ ७ ॥ जांबवान्दत्तराजस्तु भेरीशङ्खैर्मनोजवः ॥ विजयं दिक्षु सर्वा
सु महोत्सवमघोषयत् ॥ ८ ॥ मही सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाञ्चया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्या
तिमर्षिताः ॥ ९ ॥ नवा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः ॥ द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ १० ॥
अनेन याचमानेन शत्रुणा वटुरूपिणा ॥ सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि ॥ ११ ॥ सत्यव्रतस्य सततं
दीक्षितस्य विशेषतः ॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥ तस्मादस्य वधो धर्मो भर्तुः शुश्रूष
णं च नः ॥ इत्यायुधानि जगृहुर्बलेरनुचरासुराः ॥ १३ ॥ ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः ॥ अनिच्छ
तो बले राजन्प्राद्रवञ्जातमन्यवः ॥ १४ ॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्यानुचरा वि
ष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः
पतत्त्रिराट् ॥ १६ ॥ जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥ सर्वे नागायुतबलाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥ ह
२८ न्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे
राहो हे नेमे श्रूयतां वचः ॥ मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥ १९ ॥ यः प्रभुः सर्वभूतानां सुखदुःखोप
पत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥ २० ॥ यो नो भवाय प्रागासीदभवाय दिवौकसाम् ॥ स एव
भगवानद्य वर्तते तद्विपर्ययम् ॥ २१ ॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः ॥ सामादिभिरुपायैश्च कालं ना
त्येति वै जनः ॥ २२ ॥ भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ २३ ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः ॥ २४ ॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ॥ तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २५ ॥ यो नः कृपैः तं कालमतिवर्तितुं मुनीश्वरः समर्थो

दानदीपिका ॥ ५८ ॥

८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्तवस्तुवन्तोदेवनन्नदैः सम्बद्धैर्भविष्णु ॥ ३३ ॥ अथैतत्तार्यौन्तु कल्याय ॥ ३४ ॥ विष्णुरपि विज्ञानते इति विज्ञा हृत्प्रभोवी मनस्य
विकीर्षितं ज्ञात्वा प्रथमर्थः ॥ अस्यसर्वस्वापहारेणममेत्यभिमानं संत्यज्येदानीं देहस्वीकारेणाग्रहं कोरममयिवाज
यिवापरमानुग्रहं कर्त्तुं इच्छतिनवानेनतल्लेः कोपिसन्तसं योधोवीरोनास्तीतिनयशः ॥ अत्याप्रतार्यैकिंविद्
तयित्नुनपीकर्मीनिमेनोभिप्रायं तामानं वदेयेतिमौनेहनिसामाभिषवदिने ॥ ३५ ॥ रोदस्योर्यावाण्पृथिव्योः
भवद्भिर्निर्जिताल्तेनेवहुशो नुयवाहरे ॥ दैवेनैर्द्वैत्यएवाद्य युधिजिवानदैतिन ॥ ३६ ॥ एतान्त्वयं विजे
ष्यामो यदि दैवं प्रसीदति ॥ तस्मात्कालंप्रतीक्षध्वं योनोर्थायनापकल्पते ॥ ३७ ॥ श्रीशुकउवाच ॥ पत्नुर्निगदि
तं श्रुत्वा दैत्यदानवयूथपाः ॥ रसातलं विविशुराजन्विष्णुपार्षदताडिताः ॥ अथ तार्क्ष्यसुतोज्ञात्वा विवि
हि गुविकीर्षितं ॥ ववंधवारुणैः पाशैर्बलिं सौत्येऽहनिक्रतौ ॥ ३८ ॥ हाहाकारोमहानासीद्रोदस्योः सर्व
तोदिशं निगृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ ३९ ॥ तं वद्धं वारुणैः पाशैर्भगवानाह वामनः
नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ ४० ॥ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर ॥ द्वाभ्यां क्रांता
महीसर्वा तृतीयमुपकल्पय ॥ ४१ ॥ यावत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः ॥ यावद्वर्षति पर्जन्यः
तावती भूरियं तव ॥ ४२ ॥ पदैकेन मयाक्रांतो भूर्लोकोविवरैः सह ॥ स्वर्लोकस्तु द्वितीयेन पश्यतस्ते
स्वमात्मना ॥ ४३ ॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते ॥ विशत्वं निरयं तस्माद्गुरुणा चानुमोदि
तः ॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः ॥ प्रतिश्रुतस्याददानो यो र्थिनं विप्रलभते ॥ ४४ ॥ विप्रलब्धो ददामीति त्वयाहं
चाढ्यमानिना ॥ तद्व्यलीकफलं भुंक्ष्व निरयं कतिचित्समाः ॥ ४५ ॥ एवमुक्ते यदि निरये परिहारार्थं स्वर्गाद्य पायपरिहारार्थं च
मनोरथं कर्त्तुं न शक्याह हृयेतिय ः प्रतिश्रुतस्यादानेनेयाच्यं विप्रलंभनेनस्यमनोरथो व्यर्थ एव स्वर्गो दू
तस्यदूरवपतनमवाप्यः एतेन वयं याचार्हेविप्रलब्धाः ॥ तस्माद्व्यलीकफलं मनसस्य फलं निरयं भुंक्ष्वेत्यर्थः ॥ ४५ ॥

श्री
भा. अ.
टी.
८८

इति श्रीभा० भावार्थे अष्टमे एकविंशः ॥२१॥ द्वाविंशे तु प्रमत्तः सत्यस्याप्यसत्त्वेन बलिं । दत्त्वा पदं हरिर्नीत्वा ने मत्वा तद्द्वारपो ऽभवत्
विप्रकृतः अपकृतः भिद्यमानः सत्याच्चाल्यमानः ॥१॥ हे उत्तमश्लोक निकटाहतः मम वृथईरितं प्रतिश्रुतं तेन तावत्कृ ली
केन्त्वयाऽकायदेनवामनेवनभितिवा तृणानरस्य विकृत नवान् एवमपि यदि भवान्यलीकमन्यते तन्यापि कृतमेवाह् कोऽ
भिमदत्तं एवं तेवनेनभवतु मेऽश्रीर्लिगं निजपदं तृतीयं कुरु नवद्दाभ्यां विक्रमतो मे [illegible] तेवपिवः पदपर्यासे न भवति
तिमनोत्था विस्तेनचैनत्पदद्वयं जातं तद्दीदमधिकमेव स्यान्नवित्ताद पि वित्तेनाधिकारादिति भावः ननु च अपदत्र्येयवे

इति श्रीभागवते अष्टमे बलिनिग्रहो नामैकविंशः ॥२१॥ श्रीशुक उवाच ॥ एवं विप्रकृतो राजन्बलिर्भगवतासुरः
ह्रियमाणोऽप्यभिज्ञात्मा प्रत्याहाविक्लवं वचः ॥१॥ बलिरुवाच यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं
सुरवर्य मन्यते करोम्यृतं तन्न भवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजं ॥२॥ बिभेमि नाहं निरयात्पदच्युतो न पा
शावेधाद्व्यसनाद्दुरत्ययात् नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥३॥ पुंसां श्लाघ्यतमं
मन्ये दण्डमर्हत्तमार्पितं यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि ॥४॥ त्वं नूनमसुराणां नः परोक्षः परमो गुरुः यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत् ॥५॥

[illegible]

[illegible] नवपि आत्मानं सर्वतो देयपदं दैवपि थनेवपि इत्यादिवचनादात्मभयपरिहाराय सर्वस्वं त्यज्यते
वेनकुतो भीतः सन्नात्मानमर्पयसि अत आह बिभेमीति ॥३॥ असाधुवादादपकीर्तेर्यथाहं भृशमुद्विजे न तथान्येभ्य
इत्यतो न बिभेमि ॥३॥ ननु मया निगृहीतस्य ते कीर्तिस्तव जातैव नैवं त्वया दत्तं सामिति श्लाघ्यं मे त्वर्पितं दण्डमात्राद
यो पिता दिशन्ति हि नैवार्पयन्ति हि तेषामनया निगृहीतो ऽहं श्लाघ्य एवास्मीति भावः ॥४॥ नन्वहं देवानां हितैः
षीणां सुराणां तत्राह त्वं नूनमिति । परोक्षः श्रुत्वेनैव तेमानः परोक्षं वः परमो गुरुरिति वा समानतया गृहीतमेवेत्याह

विक्रमे २

८८
श्रीधरी

कथ४

ऽनुग्रहो ह्यप्रसिद्धं ॥ ५ ॥ अतो मम नावलज्जा नापि दुःखमित्याह ॥ नेनगुरुणा भवता किं च योऽयं देहः स मम सानुग्रहः
त्वयाकृतः मत्तनश्वरतोपोब्रवीन ॥ ६ ॥ नत्वहमनुग्रहस्य पात्रमित्याशयेनाह इति ॥ भवदीयानां समतःयतनुष्ठाविष्कृतः
साधुवादो यस्त्वतेमवयरमग्राह्ययोपयस्मः ॥ अतो भवतो विपक्षेणाविद्विषा हिरण्यकशिपुना विचित्रवेशास
हिंसांसंप्रापितोपि ॥ ७ ॥ देहादीनामनात्मत्वं निश्चित्य कुतो भयं प्राप्नुवेव भवतः पादपद्ममेव प्रपेदे ॥ अथ यत्तस्मादहं

यस्मिन्वैरानुबंधेन रूढेनाविबुधेश्वराः ॥ बहवो लेभिरे सिद्धिं यामेवैकांतयोगिनः ॥ ८ ॥ तेनाहं विग्र
हीतोस्मि भवतान्भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नानुव्रीडे न च व्यथे ॥ ९ ॥ पितामहो मे भवदीय
संमतः प्रह्लाद आविष्कृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ५ ॥
किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया
मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ६ ॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मं ॥
प्रपेदे ह्यकुतोभयं जनाद्दीनः स्वपक्षनपत्नास्यस्त्रमम ॥ ७ ॥ अथाहमप्यात्मरिपोस्तवांति
के दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतांतांतिकवर्ति जीवितं ययाध्रुवं स्तब्धमतिर्न बुध्यते ॥ ८ ॥

अपि देहेन नश्वरेणैव भारोपेन तवांतिकं नीत इति चतुर्णामन्वयः ॥ अंततः आयुषांतेरिक्थहारैः पुत्रैरिह गेहैः केव
लमायुषो व्यय एव न तु स्वार्थः किंचित् ॥ ६ ॥ स प्रसिद्धो महान्त्वत्पदे देत्यकुलदत्तपयतीति तथा ॥ १ ॥ तस्यापि
प्रसभं बलान्त्याजिताश्रीर्यस्य यया सत्क्रिया स्तब्धमतिः स न ॥ इमानिदं जीवितं अध्रुवं न बुध्यते ॥ कथंभूते

गतः कार्य्येण दूर्वाङ्कुरः ॥ १२॥ अंजननिषेधयापामे ॥ १३॥ सकृन्नाहं कागादिरिपुपापगायस्मरणेन सव्रीडं नीचीनमथोसखं
यस्य मे ः श्रीमानमन्त्रमूर्ध्नानमाम ॥ १४॥ बलेस्ते कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विह्वलो विह्वलः ॥ १५॥ त्वयैवे
निनदेदं पटमेतदीयं त्वयापहृतं किं तु स्वीयमेवमुनेः स्वीकृतं तत्त्वं शोभनमेव कृतेन तवेह तेः मन्य इति यस्मा

द्भुक्तः ॥ तस्य वस्त्रं माघमासस्य च द्रष्टा रोमगावन्धियः ॥ प्राजगाम जलमध्ये राकापतिविवोत्थितः ॥ १२॥
तस्मिन् समये ः स्वापिना महर्षिः श्रियाविराजमानेन नलिनायतेक्षणेन ॥ श्रीमद्भिः पितारोगो बभूव अंजननिषेधलेवलाद्
स्वमर्माणि सम्मेवतत ॥ १३॥ तस्मै बलिर्विधाता कृपापाशायां यो विकः समर्पयामास तेनापजहार दृष्ट्वैवतत ॥ तनामन्त्रं श्री
विलालललोचनः सव्रीडं नीचीनमुखो बभूव ह ॥ १४॥ ततस्तत्र हासीनमुदीक्ष्य सत्पतिस्तु नेदं नंदाधन
रेण रूपाक्षितः ॥ उपेन्द्रभूमौ स्थित्वा नामहामननं तेन नाममन्त्रं प्रपुलकाश्रुविह्वलः ॥ १५॥ प्रह्लादः त्वयैवद
त्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभन ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आ
त्ममोहनात ॥ १८॥ यया हि विद्वानपि मुह्यते यतः तं कोविदेवगाति मात्मनो गतिम् ॥ तस्मै नमस्ते जगदी
श्वराय वै नारायणायाखिललोकसाक्षिणे ॥ १९॥ शुकः ॥ तस्यानुपतः स्वपतिं साध्वी तत्पत्नी भयविह्वला
प्रांजलिः प्रणतोपेन्द्रं बभाषे वाङ्मुखी नृप ॥ १८॥

तस्मै देवयशा नाम मोहनं तस्मादि भ्रंशितं मोहनमेवाह ॥ यया श्रिया विद्वानपि यतः संयतो विमुह्यते तत्र स्यां म
त्याकोन्यः पुमानश्रात्मनो वा ॥ तितन यया वद्धि विष्टपं प्रपतिं नमस्ते महाकारुणिकाय ॥ १९॥ १८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्य प्रह्लादस्यानुशृण्वतः उवाचेति किंचित्कुर्वन्निव इत्यर्थः ॥ तदेव विंध्यावलिः बलिपत्न्यपि वक्तुं प्रवृ-
त्तेत्यर्थः नोचेत् क्षमानयोर्हि हिरण्यगर्भः त्वत्कृत्य लीलीभूतः अनुलज्ञया एव वाक्यं श्रुत्वा मदनान्वयति ॥ बद्ध्वं बीजो
ति ॥ त्रिजगतः कर्तुः प्रभोः पालकस्यास्य तव सहन्तेऽस्य स्वत्वेन मन्यन्ते च अहं मि किं समर्पयंति ॥ तथा कोपितः क
र्तारः कर्तारः स्वतंत्रा वयमिति वादिनः अपि यमानमयभावः लोकत्रयं समर्पितं तत्तृतीयपदाय देहं समर्पयति
कृतकर्तृत्वकरोमिति इत्यादि प्रभुस्वामी याविष्करोणत्र वदन्ये कुर्वन्ति तत्स्वयंत ॥ नमेवसर्वस्यापि स्वामी ॥ अतोम
विंध्यावलिः क्रीडार्थमात्मन इदं विश्वं गच्छन्ते नास्माकं ततत्र कुधियो पवईश कुर्युः कर्तुः प्रभोस्तव
किं समर्पयंति अहमिति क्रियः नस्वरोपितकर्तृवादाः ॥१०॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृ-
ताञ्जलेः हिरण्यगर्भो भगवानुवाच मधुसूदनं ॥ ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुंचैनं हृत
सर्वस्वं नायमर्हति निग्रहम् ॥२१॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्व-
स्वमात्मा विक्लवया धिया ॥२२॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां ॥ अप्यु-
त्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥२३॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृ- म॰२
ह्णामि तद्विशो विधुनोम्यहं ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥२४॥
इत्युदितमेतं केवलं कृपयापि विमुच्य पालयेति तदेव प्रह्लादस्य विंध्यावलेश्च परमार्थीकृपा आश्रमग्रोहरिः ब्रह्मा न
लोके हृष्टं विज्ञापयति भूतभावनेति त्रिभिः निग्रहानर्हत्वे हेतुः कृत्स्नेति सर्वस्वमेव आहत्येति ॥२१॥ तदेव केवलं
सर्वस्वं येनाह यत्पादयोः सलिलमात्रं प्रदाय सर्वोपि जनः उत्तमां गतिं प्राप्नोति तस्मै तुभ्यमनेन बलिः
विनः त्रीं दाश्वान् जनान् आर्तिं कथं प्राप्नुयात् ॥२३॥ तद्विशाइति पाठः तस्य विशः प्रत्ययान् ननु प्रत्यथापहारः

दुर्लभं पुरुषजन्मकथंचिल्लब्धवतोजीवस्यजन्मादिनिमित्तोगर्वोमहाहानिकरः तस्यचनाशोमदनुग्रह
दैवेत्याह यदेतिद्वाभ्यां ब्रह्मेशाः यदातुः संनिजैः कर्मभिर्नानायोनिषु क्रमिकीटादिषु संसरन्नतत्रपोरुष्यागतो
जन्मादिभिरसमृद्धिमानभवेत् तर्हिअयंमदनुग्रहएव॥२५॥कथंतर्हिभवादिभ्यः संपदोददासीतिचेत्तत्रा
हमानुषंमृतानस्यनिमित्तभूतानांसमंततः सर्वस्मिन्प्रतिकूलानांजन्मादीनांसर्वेषिजन्मादिभिरितिवाहंत
देवत्समेत्यतेनमुक्त्याभक्तस्यकयासंपदोपिददामि॥अमत्तः स्तमुक्तिदातेनदपहारइपमेवतस्यानुग्र
हपराकरात्स्रीजीवास्मासंमवन्निजकर्मभिः॥नानायोनिष्वनीशोयंपौरुषींगतिमाव्रजेत्॥२५॥जन्मक
र्मवयोरूपविद्यैश्वर्यधनादिभिः॥यद्यस्यनभवेत्स्तंभः तत्रायंमदनुग्रहः॥२६॥मानस्तंभनिमित्तानां
जन्मादीनांसमंततः सर्वश्रेयः प्रतीपानांहंतमुह्येन्नमत्परः॥२७॥एषदानवदैत्यानामग्रणीः कीर्ति
वर्धनः॥ अजैषीदजयांमायांसीदन्नपिनमुह्यति॥२८॥क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तोबद्धश्चशत्रु
भिः ज्ञातिभिश्चपरित्यक्तोयातनामनुयापितः॥२९॥गुरुणाभर्त्सितः शप्तोजहौसत्यंनसुव्रतः छ
लैरुक्तोमयाधर्मोनायंत्यजतिसत्यवाक्॥३०॥एषमेप्रापितः स्थानंदुष्प्रापममरैरपि॥सावर्णेरंतर
स्यायंभवितेंद्रोमदाश्रयः॥३१॥तावत्सुतलमध्यास्तांविश्वकर्मविनिर्मितं॥३२॥यत्राधयोव्याधयश्च
हकेवामीतिभावः॥३३॥एवंटीका॥३४॥अस्यवेदानीमन्यवत्सादन्येदुष्प्रापमपिददास्यामीतिवक्तुंतस्यमाहा
भावमाह॥एषइतित्रिभिः नत्वेतास्मिन्सजालेकाश्चिन्निलब्धः कृपणाः प्रमानइत्यादिनाछलैरेवमयायंमंड
नः नयापितंधर्मंमयंनत्यजति॥३५॥सत्यावाग्यस्य॥३६॥ममयाअहमेवाश्रयः पालकोयस्यसः॥३७॥स्थानंप्रा
पितइतियदुक्तंतदेवस्थानमाह तावत्सावर्णिमन्वंतरपर्यंतंसुतलमध्यास्तामधिवसतुविश्वयंतः॥३८॥यत्रयस्मिन्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं ब्रह्मणा प्रत्युक्तः करुणापरवशः सन्ताह बलिं प्रत्याह इंद्रसेनेति चतुर्भिः ॥ ३३ ॥ तत्रासन्मतिर्गच्छेदिति वर्तते इति ।
तथा तान् ॥ ३४ ॥ तथापि भगवद्विद्वेषो न स्यादिति चेत्तत्राह सदेति ॥ ३५ ॥ संगाद्यद्यासुरो भावः स विनंक्ष्यति ॥ ३६ ॥ इति श्री ।
भावार्थदीपिकायां टीकायामष्टमे द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे बलिर्लोकं याति स्म सुतलं सपितामहः उपेंद्रेणादिविं गत्वा पुरंदरवसो
दत्तहविः बाष्पकलाभिर्व्याकुले ईक्षणे यस्य भक्त्या उत्कलः उत्कंठः ॥ १ ॥ अहो वत प्रणामस्य महिमा यदर्थं कृतः

इंद्रसेन महाराज याहि भो भद्रमस्तु ते सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥ न त्वामभिभविष्यंति
त्रिलोकेशाः किमुतापरे । त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥ ३४ ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं स
परिच्छदं सदा संनिहितं वीर तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः दृष्ट्वा मदनु
भावं वै सद्यः कुंठो विनंक्ष्यति ॥ ३६ ॥ इति श्रीभागवते [illegible] द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युक्तवंतं पुरुषं
पुरातनं महानुभावोऽखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराब्रवी-
त् ॥ १ ॥ बलिः ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः यल्लोकपालैस्त्वदनु
ग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥ श्रीशुकः ॥ इत्युक्त्वा हरिमानत्य ब्रह्माणं सभवं ततः । विवेश सुतलं ॥

समुद्यम एव प्रपन्नानां भक्तानां योऽर्थः तस्य विधौ प्रभक्तेऽपि तत्संपादने समाहितः कृतः यद्येनायमेव लोकपा-
लैरमरैः सत्त्वप्रधानैरप्यलब्धपूर्वः त्वदनुग्रहः अपसदे नीचे राजसे तामसेऽसुरेऽर्पितः अयं भावः प्रणमस्कारायत्यं
ब्रह्मादेः त्रिलोकीदानवानित्येतदानाश्रणामोऽनमस्यकृतानां किंतु तदर्थमुद्यममात्रं कृतं तेन तत्प्रत्यो दान-
दिकोटिभिरप्यलभ्यः त्वदनुग्रहः संपादितः अहो वत प्रणामस्याश्चर्यमिति ॥ २ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मुख्याणां ईशैः मनात्नयामास ॥ ५ ॥ दुर्गपालो सिरादिष्टो हं सर्वं तत्त्वत्स्तु जानात ॥ ६ ॥ हेश रणादस्या अयमुद्दत।
स्ततयोऽर्हन्ताः खलयोनयः उग्रजातयस्तु तेक्षं तस्य भवतो दादिणपहृष्टाः परदीकस्माद्देनाः प्रणीताः बहु
मानेन दिनानुवर्तितां दासिणपोनरहष्टिस्तद्धिष्ययताश्चापितः ॥ ७ ॥ भक्तिप्रियत्वात्त्वं तत्राहं एवं तत्र वहितं च हरोविश्वे
किंतत्त्वं वामनः सर्वदशस्वभावो विषमइतियत्त्वं वामनेवविश्वचरित्वे हेतुः त्रमितामुचित्यायोगमायातयाली

एतासिंद्रायमवावान्योन्यानीयविविधं प्रतिनादिनैः काममशासत्सकलं जगत ॥ ४ ॥ लब्धप्रसा
देनिमुकुंदतोषं शाधवालि ॥ निशम्यभक्तिप्रवणः प्रह्लादः सम्अब्रवीत ॥ ५ ॥ नेमं विरिंचो लभते प्रसाद
नश्रीर्नशर्वः किमुतापरेयं ॥ यत्रोसुरापणामुपिदुर्वीपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः ॥ ६ ॥ यत्पादपद्म
मकरंदनिषेवणेन ब्रह्मादयः शरणादाश्रुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षि
ण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥ चित्रं तवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्य वि
शारदस्य ॥ सर्वात्मनः समदृशोविषमःस्वभावो भक्तप्रियोयदसिकल्पतरुस्वभावः ॥ ८ ॥ भगवानु ॥
वत्सप्रह्लादभद्रंतेप्रयाहिसुतलालयं ॥ मोदमानः स्वपौत्रेणज्ञातीनांसुखमावह ॥ ९ ॥ नित्यंद्रष्टा
सिमांतत्रगदापाणिमवस्थितं ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः ॥ १० ॥ ॥ ॥

लालयाविसृष्टानि विविधानिभुवनानियेनतस्य अद्रोहइत्यत्रसंधिरार्षः समदृशोहेतुः विशारदस्यसर्व।
तस्य ॥ स्वभावो भक्तप्रियत्वेऽपि वैषम्यनात्स्येवयतः कल्पतरुस्वभावः स त्वंभक्तप्रियोसि ॥ नहिकल्पतरवा।
श्रितानामेवकामान्पूरयन्नपि विषमोभवतीत्यर्थः ॥ ८ ॥ मद्दर्शनेन महाह्लादः तेनध्वस्तं कर्मबंधनं यस्य

प्रह्लाद उवाच
२

४७

कर्मवितन्वतः शिष्यस्य यच्छिद्रं मंत्रतंत्रतो मानेन मंत्रतंत्रविस्तारय सपत्नयजमानेन विना कथं संधातव्यमिति न वाच्य
मित्याह ॥ यद्यपि तत्र ब्रह्मदृष्टं ब्राह्मणैर्दृष्टं पुनः समं भवेत्किंपुनरनुष्ठितमित्यर्थः ॥१४॥ भवान्प्रसन्नो वैष्णवापि भावेन वस्तु
मात्रेणापूजितः तस्य कर्मसु तज्ञो वैषम्यं कथंभूतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशः यज्ञफलदः यज्ञमय।
ब्रह्मदृष्टं समं भवेत् ॥१४॥ शुक्रः ॐ तत्तत्कर्मवैषम्यं ४
शुकः आज्ञां भगवतो राजन्भ्रातुर्देवो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्नाऽदाय कृतांजलिः ॥११॥ परि
क्रम्यादिपुरुषं सर्वासुरचमूपतिः प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं ॥१२॥ अथाहोशनसं राजन्हरिर्ना
रायणोंतिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां ॥१३॥ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः य
त्तत्कर्मसु वैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥ मंत्रतस्तंत्रतश्छि
द्रं देशकालार्हवस्तुतः सर्वं करोति निश्छिद्रमनुसंकीर्तनं तव ॥१६॥ तथापि वदतो भूमन्करिष्याम्यनुशा
सनं एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनम् ॥१७॥ शुकः अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं
समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन्भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेंद्राय त्रिदिवं य
त्परैर्हृतं ॥१९॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च ॥२०॥ ॥
अथ शुक्रः ॥१५॥ मंत्रतो न्यूनाधिक्याभ्यां तंत्रतः स्वरादिभ्रंशेन तंत्रतः क्रमादिलोपात् कालतश्च अर्हतः पात्रतः
वस्तुतः दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तवानुकीर्तनमात्रमेव निश्छिद्रं करोतीति ॥१६॥ हरेराज्ञां प्रतिनंद्य बले
र्यज्ञच्छिद्रं समाधत्त संदधे पादत्रयेण तत्समाधानं प्रतिपादितवानिति शेषः ॥१८॥ देवाश्च ऋषयश्च पितरश्च भूमिपाश्च म

नवमस्कं टी ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवुलोकादीनां पतिरिंद्रोस्त्येव मन्वंतरयापि वेदादीनां कल्पपालने दत्तः ॥२१॥ तामनमुपेंद्रं कल्पयांचक्रे ॥२२॥ देव
यानेन विमानेन मार्गेण ॥२४॥ यत्तद्भवितं सर्वमाख्यातमिति विशेषोक्त्याश्रुत्वान्यपि सन्तीत्युक्तं ॥ तानि तर्हि निःशे
षेणावर्णनीयान्यपीत्यपेक्षायामाह ॥ पारमिति ॥ उरुक्रमवद्बहुधा विक्रमतो विष्णोर्महिम्नः पारं यो गृणानो भवति

कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिं ॥२१॥ वेदानां सर्वदेवा
नां धर्मस्य यशसः श्रियः ॥ मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥२२॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभू
तये ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥२३॥ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं ॥ लोकपालै
र्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥२४॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे
गतसाध्वसः ॥२५॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये
सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥२७॥ सर्वमेतन्म
याख्यातं भवतः कुलनंदन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनं ॥२८॥ पारं महिम्न उरुविक्रमतो गृणा
नो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य
यस्य ॥२९॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन्याति परां गतिं ॥३०॥

समर्त्यः पार्थिवानि रजांसि अपि विममे गणितवान् ॥ यथा पार्थिवपरमाणुगणनमशक्यं तथा विष्णोर्गुणगणा
इत्येवमाह ॥ कथं किं जायमानो जातो वा उपैति कोपीति वदन्न वै नैवाहेत्यर्थः ॥ तथा च मंत्रः न ते विष्णो जा
यमानो न जातो देव महिम्नः परमन्तमापेति ॥२९॥ य इदं शृण्वन्भवति स परां गतिं याति ॥३०॥ ४८

शुश्रूषतं यथावत्कृतं विदुः ॥ ३८ ॥ इति श्रीभावार्थदीपिकायां श्रष्टमे घोविंशोऽध्यायः ॥ ॥ ब्रह्मन्विशेषसंयोगेन मत्स्यरू
पस्य शार्ङ्गिणः लीलोच्यते यतः सत्यव्रतस्य ब्रह्मा महार्णवे ततं तेन निदर्श्यापि दैन्यं निजैश्वर्यनिदर्शनात्। मत्स्य
रूपस्य विष्णोस्तीलया वामनेनैव प्रत्यक्षमायया मत्स्यरूपेणानुकरणीयस्यां निरूप्यते ते ॥ ॥ ननु कस्मादकं देवस्मा
त्यावतारस्त्वेवैणोक्ता श्रीब्रह्मन्नेवमादृश्यपादित्याह यदर्थमिति द्वाभ्यां कर्मधर्मदुःसहं वेलेन त्वनुग्रहायत्नुगु
क्रियमाणेन कर्मणा ईदृशेषि ग्रथ्यमानुषे ॥ यत्र यत्रानुकीर्त्यते तत्तेषां सत्कृतं विदुः ॥ २ ॥ इति श्रीभागवते महापुराणेऽष्ट
मस्कंधे चतुर्विंशोऽध्यायः ॥ २४ ॥ राजः ॥ भगवञ्श्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मा
यामत्स्यविडंबनं ॥ १ ॥ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं ॥ तमः प्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः ॥
एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ॥ ३ ॥ सूत उवाच इत्युक्तो
विष्णुरातेन भगवान्बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ॥ ४ ॥ शुक उवाच गोविप्रसुर
साधूनां छंदसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥ उच्चावचेषु भूतेषु चरन्वायुरि
वेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः
समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥ यदर्थमेव लोकजुगुप्सितं मात्स्यरूपं धारयत् ॥ एतन्नो यथावद्वक्तु
महसीत्यर्थः ॥ १ ॥ मात्स्यावतारप्रयोजनमाह ॥ गोविप्रेति जुगुप्सितत्वं परिहरति ॥ ५ ॥ धियो गुणैरेवोच्चा
वचत्वानि रूपाणि न तु रूपिण एवं उच्चावचत्वं भजते निर्गुणत्वात् ॥ ६ ॥ प्रकृतमत्स्यावतारप्रसं
गमवतारयति आसीदिति त्रिभिः ब्राह्मो ब्रह्मणो नि

स्क° २

श्रेतिकेलिः स्नातः ८ शाफरीरूपं मत्स्यरूपं ९ प्रयोजनं तंतेवाह तत्र राजऋषिरित्यादि यावत्समाप्ति १० स
एव श्राद्धदेव इति ख्यातः ११ कृतमालायां तर्पणं १२ तोयं चैनोदकं मीनाकस्यैजले १३ वडवायां योगेनोपाये
काले नागतं निद्रया प्राप्तः श्रियोपायि खोर्दली १ मुखतो निःसृतान्वेदान्हयग्रीवोंऽतिके हरत् ८ ज्ञात्वा
तदा तं वेदस्य हयग्रीवस्य चेष्टितं २ धार शाफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चि
न्नाम्ना सत्यव्रतो महान् नारायणपरोऽतप्यत तपः स सलिलाशनः १० योऽसावस्मिन्महाकल्पे
तनयः स विवस्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ११ एकदा कृतमालायां कुर्वतो ज
लतर्पणं तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत १२ सत्यव्रतोंजलिगतां सह तोयेन भारत
उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः १३ तमाह सातिकरुणं महाकारुणिकं नृपं यादोभ्यो
ज्ञातिघातिभ्यो दीनां मां दीनवत्सल १४ कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले तमात्मनोनुग्र
हार्थं प्रीत्या मत्स्यवपुर्धरं १५ अजानन् रक्षणार्थाय शफर्याः स मनो दधे तस्या दीनतरं वाक्यमा
श्रुत्य स महीपतिः १६ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमं सा तु तत्रैकरात्रेण वर्धमाना
कमंडलौ १७ अलब्ध्वात्मावकाशं वा इदमाह महीपतिं नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमिहोत्सहे
कल्पयौकः सुविपुलं यत्राहं निवसे सुखं १८ स एनां तत आदाय न्यधादौदंचनोदके १९ तत्र क्षिप्ता मुहू
र्तेन हस्तत्रयमवर्धत २ न म एतदलं राजन्सुखं वस्तुमुदंचनं २० पृथु देहि पदं मह्यं यत्त्वाहं शरणं
गता ततस्तत आदाय सा राजा तां सरोवरे २१ तदावृत्यात्मना सा कं महामीनोऽन्ववर्धत नैत
न्मयाम्महाह्रो भीमे सर्वाकुलेविनाशमर्ष्यं तेनोपायेन निधेहि प्रविदासिनि श्रनुपद्रवे २२ ॥ राम

सं.त

समितं तन्मञ्जलाशयेपविनितं ॥ २४ ॥ अभिव्यानशे अभितो व्याप्नुवान् ॥ २६ ॥ मुख्यः सम्यगात्मावगातिः प्राप्स्यय ॥ २८ ॥ हे अरविं
दाक्षपदोपसर्पणं मृषा भवेत् सुहृत्प्रियात्मनो देहाद्यभिमानिनां सतामितरेषां ॥ यथा तथा सर्वसुहृत्प्रियात्मनः तव पादोपसर्पणं

जलाशयेऽसमितं तं समुद्रे प्राक्षिपज्झषं ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ २३ ॥ अदंत्यतिबला वीर मां
नेहोत्स्रष्टुमर्हसि ॥ एवं विमोहितस्तेन वदता वल्गुभाषितं ॥ २४ ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन्
॥ नैवं वीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि वा ॥ २५ ॥ यो भवान्योजनशतेनाह्नाभिव्यानशे सरः ॥ नूनं त्वं भग
वान्साक्षाद्धरिर्नारायणोऽव्ययः ॥ २६ ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसां ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्य
प्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥ सर्वे लीलावतारास्ते भूतानां भूतिहेतवः
ज्ञातुमिच्छाम्यदोरूपं यदर्थं भवता धृतं ॥ २९ ॥ न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः य
थेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ३० ॥ इति ब्रुवाणं नृपतिं जगत्पतिं सत्यव्रतं मत्स्यव
पुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रभुः ॥ ३१ ॥ श्रीभगवानुवाच ॥ सप्तमे
ऽद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ॥ ३२ ॥ ॥

न मृषा न भवति ॥ यद्यस्माद्भक्तानां अद्भुतं वपुः अदीदृशः दर्शितवानसि पाठांतरे पृथगात्मनो भेददर्शिनः पुंसः अस
तां पदोपसर्पणं यथा मृषेत्यर्थः ॥ ३० ॥ एकांतजना भक्ताः प्रिया यस्य ॥ ३१ ॥ अप्ययांभोधौ प्रलयार्णवे भूर्भुवस्व

नां

टीकाष्टमः ३१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
५

संवर्तांभसिप्लवत्योदयेनामुपस्थास्यतिप्राश्यनि ॥ ३३ ॥ डोषधीरादायेतिशेषः ॥ ३४ ॥ ऋषीणामेवालोकेनविचरिष्यसि ॥ ३५ ॥ म

त्रिलोक्यांलीयमानायांसंवर्तांभसिवैतदा ॥ उपस्थास्यतिनौःकाचिद्विशालात्वांमयेरिता ॥ ३३ ॥ त्वंतावदोषधीः
सर्वाबीजान्युच्चावचानिच सप्तर्षिभिःपरिवृतः सर्वसत्वोपबृंहितः ॥ ३४ ॥ आरुह्यबृहतींनावंविचरिष्यस्यविक्लवः
वः एकार्णवेनिरालोके ऋषीणामेववर्चसा ॥ ३५ ॥ दोधूयमानांतांनावंसमीरेणबलीयसा ॥ उपस्थितस्यमेशृं
गेनिबध्नीहिमहाहिना ॥ ३६ ॥ अहंत्वामृषिभिःसाकंसहनावमुदन्वति ॥ विकर्षन्विचरिष्यामियावद्ब्राह्मीनिशा ॥ २८
प्रभो ॥ ३७ ॥ मदीयंमहिमानंचपरंब्रह्मेतिशब्दितं ॥ वेत्स्यस्यनुगृहीतंमेसंप्रश्नैर्विवृतंहृदि ॥ ३८ ॥ इत्थमादिश्य
राजानंहरिरंतरधीयत ॥ सोन्ववैक्षततंकालंयंहृषीकेशआदिशत ॥ ३९ ॥ आस्तीर्यदर्भान्प्राक्कूलान्राज
र्षिःप्रागुदङ्मुखः ॥ निषसादहरेःपादौचिंतयन्मत्स्यरूपिणः ॥ ४० ॥ ततःसमुद्रउद्वेलःसर्वतःप्लावयन्म
हीं ॥ वर्धमानोमहामेघैर्वर्षद्भिःसमदृश्यत ॥ ४१ ॥ ध्यायन्भगवदादेशंददृशेनावमागतां ॥ तामारुरोहविप्रेंद्रैरा
दायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयःप्रीताराजन्ध्यायस्वकेशवं ॥ सवैनःसंकटादस्मादविताशंविधास्य
ति ॥ ४३ ॥ सोनुध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे ॥ एकशृंगधरोमत्स्योहैमोनियुतयोजनः ॥ ४४ ॥ निबध्यना
वंतच्छृंगेयथोक्तोहरिणापुरा ॥ वरत्रेणाहिनातुष्टस्तुष्टावमधुसूदनं ॥ ४५ ॥

हाहिनावासुकिना ॥ ३६ ॥ मेमयाअनुगृहीतंप्रसादीकृतंहृदिप्रपरोक्षंवेत्स्यसि ॥ ३८ ॥ वरत्रेणाडोरकेण ॥ ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मायां तावद्विधित्रं तेन विधान्नि वक्ष्यामि सत्यव्रतो मुकंडेन तत्र श्राद्धकरिमहर्षिभिः प्रत्यक्षं चिंत्यं किमयं महाप्रलयो यद्वा नैमित्तिको वे
ति तत्र नाव ब्रह्मा लयः इति यो सा वक्ष्मि महाकल्पः इति वाक्ये महाप्रलये इति प्राप्ते नेति [illegible] ब्रूमः महाप्रलये पृथ्वि
व्यादीनामेव प्रोषासंभवात् यावद्ब्रह्मणी निशेत्यादि ॥ उक्तिविरोधात् । प्रतीते नैमित्तिके इति युक्तं न चैतदपि संगच्छते सावर्ती
के तत्र ब्रह्मादिभिर्विना [illegible] कस्मादेव सप्त मे महनिते लोकं विनंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः यत्त्वोक्तं प्रथमस्कंधे रूपं स ज
गृहे मात्स्यं चाक्षुषांतरसंप्लवेनाव्यो मही मय्यामपाहे वस्वतमनुमिति तदपि न ताडवधं न दिश्रलयहर्षेपि मही
मय्यां नाव्यारोहः । संभवति न चाक्षुषमन्वंतरप्रलयोस्ति तया वसति सप्तमो मनुर्वैवस्वतः इत्यपि उर्वरं स्यात् ॥ वंनावा
रोहथीः मवहिन्यादि निर्देशोपि न संगच्छते नहि तदा ओषध्यादीनां सत्वानां वा विशेषः संभवति तस्मादन्यथाव एवं

श्रीरामो [illegible] वाच प्रलयापयोधि जले पहतानाम् संविदः त्रस्तस्य तस्य संसारविश्वमात्रयाः यत्र ये
दोपरता यस्मात् मुर्विमुक्तिं तः प्रवमोघ्रुरभंवान् ॥ ४६ ॥ ॥

राम ॥ राम

तेनैवा संवादनवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञानोपदेशाय प्रादुर्भूतो भगवान्वैराग्यपार्थं मकस्मात्प्रलयं
दर्शयामास । यथा मार्कंडेयाय नेवं वस्वतमन्वंतरे मार्कंडेयाय प्रदर्शितवान् । तदपि तस्यैव च महाकल्पेऽन्निलि । विशेषणानि स्मि २
गच्छते । तथा च ततः समुद्र उद्वेलः सर्वतः समं [illegible] इत्येनेति । तस्यैव तथा दर्शनमुक्तमित्येषा दिक् । प्रस्तुतमस्ते
वं व्याख्यास्यामः । तत्र नानायोनिषु तं निनः । तस्य भगवत्कृपयैव तत्त्वप्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते । यं नादि र्यो ३
अविद्यातयाऽपहतानाम् आवृतात्मनां संविदेषां तेषु तत्पवाविद्यामूलः । संसारपरिश्रमे वातरा इह संसारे यदृच्छया
दृष्टः देवोपरतानाम् अन्तः संतोयेषाम् गुरुः संभवानेव मा तारोऽगुरु संसन्यांथिभियादित्युत्तरेणान्वयः ॥ ४६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु वैराग्यं विना कुतो मुक्तिः तर्हि तस्य तन्नैवैर्वैफल्लब्धासेवामादि शेत्याशयेनाह त्वबुधो यं जनः समुल्लेय यथा भवति तथा कर्मस
मीहते नंदिविछ्छा नाहृदयत्वपंग्रथिसमिथ्यातरात स्वपवपदमोगुहः ॥ ४७ ॥ नवयसत्‌दामादिमि: मवसुद्धिं विना कथं ग्रथिभेदः स्या
त्वाह यस्य सेवयैवपुमानात्मनो मनसो मलं तमो विजहात्यु हीनमलः निजं वर्णं च स्वरूपं भजेत तस्य ईशानः गुरूर्भूयात यतः स्वप
व गुवोरपि पवमोगुरुः मलदाने दृष्टांतः रूदोदनेव जते यदशेदीन्तुदृस्यरुदत्वयदवशीर्यते तदूजं नहि गुणएव मभवदिति श्र
तेनयथाग्रः मेपकाम्नलंज हातिस्ववर्णं भजते वन्तुदालनातिमि: मलत्यागः किंतु वन्त्लेवये वतेषां तु सेवागत मेवेति भावः

चेतो बुधायैनिज कर्मबंधनः सुखेच्छयाकर्मसमीहतै सुखे यत्सेवया तां विधुनो त्यसंग्रथिसेभियाद्गुरुयं स नो गुरुः ॥ ४८ ॥
यत्सेवया ग्रेरिव रूद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः भजेत वर्णं निजमेव सोव्ययो भूयात्स ईशः परमो गुरोर्गुरुः
४९ नयत्प्रसादायुत भागलेशमन्ये च देवा गुरवो जनाः स्वयं कर्तुं समेताः प्रभवंति पुंसः तमीश्वरं त्वां शरणं प्रपद्ये
५० अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोबुधो गुरुः त्वमर्कदृक्सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वग
तिं बुभुत्सतां ॥ ५१ ॥ जनो जनस्यादिशते सतीं मतिं यया प्रपद्येत दुरत्ययं तमः त्वं त्वव्ययं ज्ञानममोघमंजसा
प्रपद्यते येन जनो निजं पदं ॥ ५२ ॥ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः न
था पि लोको न भवेन नंदधीर्जानाति संतं हृदि बद्धकामः ॥ ५३ ॥
॥॥॥॥॥॥

परमेश्वरत्वं तव मम गुरुत्वं च प्रपद्ये यन्नाह यत्प्रसादस्यायुतभागः तस्य लेशमात्रमपि अन्ये देवादयः सर्वे समेता अपि स्वयं
न प्राप्यं वा संतः कर्तुं न प्रभवंति ॥ ४९ ॥ नदेव दृष्टांतेन [illegible] स्फुटयन्नाह अचक्षुरिति अविदुषो जनस्य बुधो विद्वान् य
था स्वयं वा अर्कः श्वावतत्त्वतः पश्चात्तं यस्य सः अर्कदृक् सर्वेंद्रियाणां समीक्षक प्रकाशकः अतएव गतिं बोद्धुमिच्छ
तिं नो स्माभिर्गुरुर्वृतोसि ॥ ५० ॥ किंच प्राकृतो गुरुरनर्थमेव तदेवेत्याह जन इति अनादिशते उपदिशति असतीं मतिं मर्थकामा
दिमतिं तमः संसारं ॥ ५१ ॥ ननु तर्हि सर्वो पि लोको मामेव किं नोपसरति ग्रहत्वादित्याह त्वमिति प्रियः श्रासावीश्वरश्च प्रियेश्वर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तं त्वामिति प्रतिबोधनाय उपदेशाय ॥ अर्थदीपैः परमार्थप्रकाशकैः ॥ हृदय्यान् ग्रंथीन् अहंकारादीन् स्वमोकः
स्वरूपं विवृणु प्रकाशय ॥५३॥ नृपतिं प्रति पुराणसंहितां मत्स्यपुराणम् अशेषतः अब्रवीदित्यनुषंगः ॥५५॥

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्वि
वृणु स्वमोकः ॥५३॥ श्रीशुकः ॥ इत्युक्तवंतं नृपतिं भगवानादिपूरुषः ॥ मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्र
वीत् ॥५४॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीं ॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥५५॥
अश्रौषीदृषिभिः साकमात्मतत्वमसंशयं ॥ नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ॥५६॥ अ
तीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥५७॥ स तु सत्यव्रतो रा
जा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ॥५८॥ सत्यव्रतस्य राजर्षे
र्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥५९॥ अवतारो हरेर्योयं
कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिं ॥६०॥ प्रलयपयसि धातुः सुप्तशक्ते
र्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखि
लहेतुं जिह्ममीनं नतोस्मि ॥६१॥ इति श्रीभागवते महापुराणेऽष्टमस्कंधे मत्स्यावतारकथनं नाम चतुर्विंशोध्यायः ॥२४॥

योयं हरेरवतारः तं यः प्रकीर्तयेत् ॥६०॥ अतीतप्रलयापायः तस्यापाये अवसाने सत्यव्रतानां सत्यव्रत[illegible]स्य ऋषीणां
ब्रह्मनिर्णेणां ग्रंथनीतिवत् न त्विंगमनतया उद्दूवचनेन जिह्ममीनं मायामीनं ॥६१॥ इति श्रीभावार्थदीपिकायां अष्टमे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

16

ग्रन्थः समाप्तः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative